श्रीः

श्रीमते रामानुजाय नमः

श्री राम ध्यानम्

अयोध्यानगरे रम्ये रत्नमण्डप मध्यगे।

स्मरेत् कल्पिततरोर्मूले रत्नसिम्हासने शुभे।

तन्मध्ये अष्टदळं पद्मं नानारत्नैश्च वेष्टितम्।

स्मरेन्मध्ये दाशरथिं सहस्त्रादित्य तेजसम्।

पितुरन्तर्गतं रामं इन्द्रनील मणिप्रभम्।

कोमळाङ्गं विशालाक्षं विद्युत् वर्णाम्बरावृतम्।

भानु कोटिप्रतीकाशं किरीटेन विराजितम्।

रत्नग्रैवेय केयूरं रत्न कुण्डल मण्डितम्।

रत्न कङ्कण मञ्जीरं कटिसूत्रादलंकृतम्।

दिव्य रत्न समायुक्तं मुद्रिकाभिरलंकृतम्।

राघवं द्विभुजंबालं रामं सुस्मितमाननम्।

तुळसी कुन्दमन्दार पुष्पमालैरलंकृतम्।

कर्पूराऽगरु कस्तूरि दिव्यगन्धानुलेपनम्।

योगशास्त्रं शोभितरतम् योग संयोगदायकम्।

सदाभरत सौमित्रि शत्रुघ्नैरुप शोभितम्।

विद्याधर सुराधीशैः सिद्ध गन्धर्व सेवितैः।

योगीन्द्र नारदाद्यैश्च स्थूयमान महर्निशम्।

विश्वामित्र वसिष्टादि मुनिभिः परिसेवितम्।

सनकादि मुनिश्रेष्टैः योगविद्यैश्च सेवितम्।

रामं रघुकुल श्रेष्टं ध्यायेत् हृदय पङ्कजे।

- - - -

विनावेङ्कटेशं ननाथो ननाथःसदा वेङ्कटेशं स्मरामि स्मरामि।

हरे वेङ्कटेश प्रसीद प्रसीद प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ ।

श्रीः

वचनसारे प्रथमोभागः

नित्याराधन अग्निकार्य - विषये

अर्चक लक्षणमाह

अर्चकस्य कुलोत्पन्नः भगवन्तं समर्चयेत्।

अर्चको वंशवान् पुत्रःअनाचारोप्यमन्त्रवान्।

तद्वंशज मात्रेण मम कर्मणि अर्हति। (श्रीप्रश्ने)

<u>अर्चकस्य अलंकरण विधिः</u>

यत्किंचिद्दवळं पुष्पं यत्किञ्चिदनुलेपनम्।

अलक्ष्म्याः परिहारायैनित्यं धारयेद्विजोत्तम।

अङ्गरागैः गन्ध माल्यैःवस्त्र विचित्रकैः।

रत्नाङ्गुळीयकैः चित्रैःभूषणैः विविधैः शुभैः।

हेम यज्ञोपवीतेन उत्तरीयेण भास्वतः।

दुकूलैः सूक्ष्मवस्त्रैश्च उष्णीषमुखवाससैः।

कटकैर्वलयैश्चैव केयूरैः पट्टबन्धनैः।

वस्त्राभरण माल्यैश्च सर्वाऽलंकार शोभिताः।

अभुक्तोवा सुभुक्तोवा कृत कृत्यच्च पूजकः।

सपवित्र उभौ हस्तौ शुचिर्भूत्वा समाहिताः। (जयोत्तरे)

भट्टाचार्याणां योग्यता विशेषं(1)

चतुर्वेद विदो विप्रान् प्राहुः श्रोत्रिय संज्ञिकः।

दशश्रोत्रिय तुल्यस्तु अर्चकः पाञ्चरात्रवित्।

दशाऽर्चकः समःपूर्णः दशपूर्ण समोगुरुः।

गुरूणां दशभिस्तुल्यः भट्टाचार्यस्स उच्यते। (विहगेन्द्रे)

भट्टाचार्याणां योग्यता विशेषं(2)

पाञ्चरात्रञ्चवेदाश्चवेत्ति सः पूर्णसंज्ञिकः।

योऽधीते वेदवेदाङ्गं पाञ्चरात्रमपि द्विजः।

अध्यापयति शिष्यांस्तु पाञ्चरात्रमपि श्रुतिः।

दशपूर्णसमस्सोऽयं दीक्षितोगुरुरुच्यते।

दीक्षितस्य कुलेजातः भट्टाचार्येण दीक्षितः।

गुरोर्मुखात् त्रयींविद्यां अर्थवत् पाञ्चरात्रकम्।

प्राप्तः शमदमोपेतःसतु भट्टारको भवेत्।

दशभट्टारक समोवेद वेदाङ्ग पारगः।

वेदान्तार्थप्रवीणाश्च पाञ्चरात्रार्थ तत्ववित्।

परंपरादीक्षितस्य कुलेजातः समाधिमान्।

दीक्षामुभयतः प्राप्तः पञ्चकालःक्रियापरः।

योगशास्त्रप्रवीणश्च ज्ञानवान् मोक्षचिन्तकः।

भुवः परिग्रहाद्यावत्प्रतिष्ठान्तं च याक्रियाः।

असहायेन तांकर्तुं शक्तो मध्ये न रोगवान्।

स्वतन्त्रो वृद्ध सेवीच रूपवानपि चास्तिकः।

परैरनिन्दितश्चैव कीर्तिमान् विजितेन्द्रियः।

मानसाराधने दक्षो मन्त्र शास्त्र विशारदः।

सिद्ध मन्त्रस्सर्व दर्शी भट्टाचार्यः स उच्यते। (श्रीः)

आचार्य पद् निरुक्तिः

आचिनोतीहि शास्त्रार्थान् आचारे स्थापयन्त्यपि।

स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते। (पराशरे)

आचार्यस्य माहात्म्यं

आचार्यं तोषयेद्विद्वान् सर्वकाले हरि प्रिये।

आचार्यः सुप्रसन्नेतु देवदेवः प्रसीदति।

वंशे भागवता प्रसूता येच मानवाः।

तेषां दीक्षाविधिर्नैव उपदेशेन केवलम्।

भट्टाचार्यो भवत्येव तदाश्रयेण जगद्गुरुः।

आचार्य दृष्टमात्रेण देववत्परिभावयेत्।

अर्चकस्य मनस्तुष्टिः देव सन्तुष्टिरेवच।

अर्चकं क्लेशयित्वा तु तद्ग्रामं नाशनं भवेत्।

अर्चकस्य करस्पर्शात् शुद्धिर्भवति जगत्पतिः।

सन्निधत्ते सदा तत्र द्वयेनाऽष्टाक्षरेणवा। (वि-तिलके)

अमन्त्रमर्चकेन प्रत्यवायः

चलमप्यचलं चेति द्विविधं परिकीर्तितम्।

अचलं बिम्बमित्युक्तं चलं अर्चकमेववा।

सर्पं दृष्ट्वा महाकायः कंपते च मुहुर्मुहुः।

अमन्त्रमर्चकं दृष्ट्वा दूरेभ्येति जनार्दनः। (विष्णु तत्वे)

<u>देशिकस्य पद् निरुक्तिः</u>

दकारो देवतारूपः शकारो शास्त्र कोविदः।

ककारो कर्मनिपुणः देशिकःपरिकीर्तितः। (खगप्रश्ने)

<u>अर्चक वाक्य माहात्म्यम्</u>

अर्चकस्यतु यद्वाक्यं विष्णुवाक्यमितीरितम्।

तद्वाक्यमन्यथा कृत्वा सदेवः कोपमाप्नुयात्।

प्रासादं देवदेवस्य आचार्यं पाञ्च रात्रिकम्।

दूराद्दर्शन मात्रेण प्रणमेद्दण्डवद्भुवि। (वि-तिलके)

<u>दीक्षितस्य माहात्म्यम्</u>

विष्णोरागम शास्त्रज्ञः पूजने दीक्षितो द्विजः।

अन्यविप्रै अर्चयेद्वा सवै देवलकः स्मृतः।

दीक्षितो यो निजश्शुद्धः पाञ्चरात्र कृतश्रमः।

सएव भगवद्रूपं विष्णु पादनलोबिनः।

पाञ्चरात्रोक्त मार्गेण यो दीक्षा चक्रमण्डले।

कृत्वा समर्चनं विष्णोः द्विषड्वाक्षर विद्यया।

आराधयेत् सशास्त्रोक्त विधिना देशिकोत्तमः।

तेषां हृदंबुजे साक्षात् आविरस्ति परःपुमान्।

तरन्ति विष्णुमायांते (ते)नतरन्तीतरे जनाः।(पाद्मे)

अर्चकस्य कर तीर्थस्य माहात्म्यम्

अर्चकस्य करे तीर्थं भागीरथ्यां समं शुचिः।

अन्य विप्र करं तीर्थं सुरापान समं भवेत्।

हरेःप्रसादम् तीर्थंच भक्त्याच तुळसी दळम्।

अर्चकस्यतु हस्तेन दातव्यं सर्वदैवहि।

कोटिजन्म कृतं पुण्यं विष्णोराराधनं परम्। (अगस्त्ये)

आचार्यस्य वयोः क्रमः

आचार्यो मन्त्र सम्पूर्णः ज्ञान सम्पूर्ण दीक्षितम्।

गुरुश्च शास्त्र संपूर्णः सर्व संपूर्ण वंशजाः।

आ षोडशाब्दपर्यन्तं बाल इत्यबिधीयते।

पञ्चविंशतिसंपूर्ण वत्सरस्य युवा भवेत्।

परं समो मध्यमः षष्टिवर्षाऽवसानकम्।

अत ऊर्ध्वान्तर श्रेष्टं जीर्णमित्यभिदीयते।(परम संहिता)

तेषां कार्य भेदेन आचार्य भेदाः

नित्यार्चन विधौ बालः उत्सवादा युवा भवेत्।

स्थापने प्रोक्षणं कर्तुं वार्धकःदीक्षितेपिच। (परम संहिता)

अर्चकस्य अलंकरण विषये (१)

गन्धैः स्त्रग्भिरलंकारैः सोत्तरीयंच भूषितैः।

कर्णभूषण हाराद्यैः कटकैरङ्गुलीयकैः।

अलाभेत्यङ्गुलीयेनाऽलं कृत्यतु साधकः।

वदनं नासिका रन्ध्रौ स्थगयित्वाऽम्बरेणतु।

स्वश्वासोपहतश्चैव न भवेच्चयथा द्विजः।

शुक्ल वासो सुवेषश्च शुक्ल दन्तश्शुचिस्मृतः।

ताम्बूल धार वदनो ललाटेच अक्षतैर्युतः।

एवमुक्त गुणैर्युक्तः शोधयेत् पुरुषोत्तमम्। (कपिञ्जले)

अर्चकस्य अलंकरण विषये (२)

शुद्धवस्त्रं उत्तरीयञ्च कौपीनं मुखवाससम्।

द्वादशं ऊर्ध्वपुण्ड्रं च हैमयज्ञोपवीतकम्।

पवित्रं तुळसी पद्मं कुशपाणिरलंकृतम्।

कटकैर्वलयैश्चैव केयूरैः कटि बन्धनैः।

रत्नाङ्गुळीयकैश्चित्रैः मुक्ताहार समन्वितैः।

कस्तूरिकादि गन्धंच मालापुष्पाणि धारयेत्।

वासनादिच ताम्बूलं भक्षयेतु शुचिस्मिताः।

आजानुपादौ प्रक्षाळ्य आचम्यच विजितेन्द्रियः।

आसाद्य द्वार देशेतु देवं साष्टाङ्गमुच्यते। (ब्रह्म संहिता)

पाञ्चरात्रिक अर्चकस्य नामान्तराणि

भागवतः, भट्टारकः,भगवद्वंशजः,मंत्रि, कारि, देशिकः सात्वतः, एकायनः, एकान्तिकः,

वासुदेविकः,पाञ्चरात्रिकः, भगवद्वंशजः, भगवन्मयाः, रहस्याम्नायःनिष्टाः,त्रय्यन्तज्ञान

संपन्नाः, द्वादशाक्षर तत्वज्ञाः,चातुर्व्यूह विभागवित्। अच्छिद्र पञ्च कालज्ञः।इत्यादयः।

अर्चकस्य वैशेषिकम्

दैवाधीनं जगत्सर्वं मन्त्राधीनं तु दैवतम्।

तन्मन्त्रं अर्चकाधीनं अर्चको मम देवताः।

उत्तमा पाञ्चरात्रस्थाः मध्यमास्तु त्रयीमयाः।

तन्त्रान्तरं तु विज्ञेया अधमा शास्त्रकोविदाः।

सप्तकोटिमहामन्त्राः यस्य चिन्तेऽवस्तिष्ठति।

स एव भगवद्रूपो अर्चको नात्रसंशयः।

अर्चकस्सहरिःसाक्षात् चल रूपी न संशयः। (ल-तन्त्रे)

अर्चक दर्शनेन फलमाह

दर्शनंत्वर्चकस्यापि हरिभावेन केवलम्।

सर्वसंपत्करं भूयात् सर्वपातक नाशनम्। (परमपुरुषं)

आचार्य पद निरुक्तिः

आकारादागमज्ञेयः चकारोऽऽचार कोविदः।

यकारो याज्ञिको ज्ञेयः आचार्यः परिकीर्तितः। (परमपुरुषं)

गुरोः प्राशस्त्यम्

गुरुरेव परं सत्यं गुरुरेव परात्परम्।

गुरुरेव परो देवःगुरुंचैव परंधनम्।

एकः प्रसूनां सलिलं च किञ्चित्-

अमन्त्रकं वाऽपि समन्त्रकं वा।

तमर्चयेद्यो हरिमूध्नि भक्त्या

स वंश कोट्या धृत कोटिपुण्यम्। (पुरुषोत्तमं)

अर्चकाणां वैभवम्- श्रेष्ठतमंच

मोक्षशास्त्रं यथा श्रेष्टं शास्त्राणां विविधात्मनाम्।

द्विपदां अर्चकः श्रेष्टः यथा गौच चतुष्पदाम्।

लोहानां कनकं श्रेष्टं रत्नानां कौस्तुभं यथा।

माता श्रेष्टं गुरूणांच रात्रौप्रबोधयद्यथा।

तत्वानां सर्गविन्यासो भवानां च यथोत्तमाः।

तथोत्तममिमं तन्त्रं तन्त्राणां तत्व वादिनाम्।

भगवान् वासुदेवोस्मि विष्णुर्नारायणो गुरुः। (ल- तन्त्रे)

परंपरा दीक्षितस्य वैशेषिकम्

अर्चको वंशवान् पुत्रः अनाचारानमन्त्रवान्।

यो यजेद्यदि मे प्रीतिः पूजायान्यन्यसमाह्वयेत्। (वासिष्टे)

मन्त्रादीनां सामान्यभावध्याने प्रत्यवायः

मन्त्रमक्षर रूपं च शिलारूपञ्च विग्रहम्।

गुरुं मानुषरूपञ्च सामान्यं नैव qचतयेत्।

चिंतयेद्यदि मोहेन रौरवं नरकं व्रजेत्। (ईश्वरे)

ईश्वरस्य सान्निध्य अतिशयाः स्थलानिच

तीर्थमध्ये स्वहृत्पद्मे बिम्बे वेध्यास्थलेपिच।

वह्निगर्भेच निर्धूमे नित्यमस्ति चतुष्टये। (सात्वते)

मन्त्रस्य वैशेषिकत्वं

द्रव्यं शरीरमित्युक्तं क्रियाऽङ्गमिहोच्यते।

मन्त्रश्च प्राणमित्युक्तं दिव्यशक्तिमिहोच्यते। (वास्तु शास्त्रे)

अमन्त्रेण पूजनीय अर्चकस्य प्रत्यवायः

व्याघ्रं दृष्ट्वा महारण्ये पुरुषो कक्म्पयेत् द्विज।

अमन्त्रमर्चकं दृष्ट्वा दूरो याति जनार्दनः।

अन्त्य कालेच मृत्युंच दृष्ट्वा जीवो यथा भवेत्।

तथा अर्चकं पापिनं दृष्ट्वा दूरेऽभ्येति जनार्दनः। (पराशरे)

अमन्त्रमर्चकेन अकालपूजनेन दोषः

अमन्त्रमर्चनं कुर्यात् दूरे भीतो जनार्दनः।

छाया मृगपतिं दृष्ट्वा गजवद्भीत कंपितः।

क्रिया शरीर मित्युक्तं तन्मन्त्रं जीव मुच्यते।

मन्त्रहीनं क्रिया हीनं तच्छक्त्या निष्फलं भवेत्।

अमन्त्रमर्चनं कुर्यात् अकालेचापि पूजनम्।

ग्राम नाशंच दुर्भिक्षं राजराष्ट्रो विनश्यति। (परम संहिता)

बिम्ब सान्निध्य अतिशय विषयं

आचार्यो मन्त्र संपूर्णः क्रिया पूर्णस्तु शिल्पिनः।

दातायो वित्त पूर्णस्तु बिम्ब सान्निध्य कारणम्।

अर्चकस्य तपोयोगात् पूजायाश्चाऽतिशयेनच।

आभिमुख्याश्च बिम्बस्य तत्र सन्निहितो हरिः। (श्रीः-पारमे)

अष्टविध नियमाः

अ हिंसा ब्रह्मचर्यञ्च सत्यमार्जव मेवच।

अक्रोधनंऽनसूयाच दमो नित्यमुपै गुणम्।

अष्टागुणानि च युक्तस्यात् व्रतेषु नियतेन्द्रियः। (मार्कण्डेये)

भगवतः-अर्चक भावनारूप वैशेष्यं (1)

आचार्य शिष्यवन् मन्त्रविष्टरे स्नपनासने।

जननीव शिशुं रथ्यां सतीव प्रिय नायकम्।

अलंकारेऽतिथिंथचैव भोज्यायां गृहस्तवत्।

यात्रासनेतु शय्यायां नृपं मन्त्रीव सेवकः।

प्रार्थनायां मित्रवच्च देवं ध्यायेत पूजकः।(श्रीः)

भगवतः-अर्चक भावनारूप वैशेष्यं (2)

प्रपन्नानां सदासंयग्विष्णोर्दास्यं चतुर्विधम्।

पतिभार्यादि संबंधं पितृ पुत्रादिकं तथा।

स्वामि भृत्यादि संबंधं शिष्याऽऽचार्यादिकं तथा।

एतच्चतुर्विधं दास्यं विष्णुःप्रीतिकरं सदा।(पराशरे)

अनर्चक लक्षणमाह

पञ्च संस्कार रहिताः शिखाकौपीन वर्जिताः।

नित्यकर्मादि रहितः अनर्चक इति स्मृतः।

प्रपत्ति रहितस्सोऽपि अधमश्च भवेन्मुने।

अनर्चक द्विजातीनां तीर्थपानं सुरा समम्।

प्रसादं मांसतुल्यं च चंदनं रुधिरं भवेत्।(पराशरे)

अर्चकेषु देवलकत्व विधिः

परार्थे तिलहोमंच परार्थे रुद्रजापकः।

स वै देवलको नाम सर्वकर्म भहिष्कृतः।

शिवार्चनंचैव शिवद्विजेन श्रीपाञ्चरात्रार्चनमेवविष्णोः।

अन्य द्विजानामर्चनमेव कार्यं चण्डाळको देवलकं भवन्ति।

अन्यत्र

प्रस्थतण्डुलमुद्दिश्य योदेवाऽर्चनंचरेत्।

सवै देवलको नाम ब्रह्मघादिषु गर्हितः।)ह्रीप्रश्ने)

मन्त्रे लिङ्गत्रय भेदाः

ऐहिकाऽऽमुष्मिकं सर्वं मन्त्रेणैव प्रसिद्यति।

स्त्रीपुंनपुमिति त्रैवं भजंते मन्त्र जातयः।

संस्त्यानमन्त्राःस्वाहान्ताः नमोऽन्तासु नपुंसकाः।

शेषाःपुरुषमन्त्राःस्युरिति त्रिविधमीरितम्।(पाद्मे)

मन्त्रस्य वैशेषिकत्वं

द्रव्यं शरीरमित्युक्तं क्रियाऽङ्गमिहोच्यते।

मन्त्रश्च प्राणसम्युक्तं दिव्यशक्तिमिहोच्यते।(वास्तु शास्त्रे)

वेदपूर्व आराधनस्य वैशेषिकम्

उत्तमं वेद पूर्वोक्तं मध्यमं मन्त्र पूर्वकम्।

अधमं तन्त्ररूपंतु आराधन विधिम्चरेत्।

पूजन कालभेदेन मन्त्रभेदाश्च

प्रातःकाले उपनिषदः माध्याह्ने पौरुषं भवेत्।

नारायणोपनिषद्रात्रौ त्रिकालं वेदपारगैः।(अनंताख्ये)

पूजायां अन्यत्र नामानि

अर्चनं पूजनं पूजा याग माराधनं तथा।

अर्चना च प्रपूजाच समाराधनमेवच।

संपूजनञ्च नवधा कथितान्यर्चनाविधौ। (अगस्त्ये-मार्कण्डेयं)

भगवत्पूजायां अन्यत्रदेवपूजायां वैशेषिकम्

दिवानां देवतापूजा रात्रिपूजाकदाचन।

सततं पूजयेद्देवं दिवारात्रौच पूजयेत्। (विश्वामित्रे)

प्रतिष्टा प्रोक्षणंचैव मरणे क्षोभकानने।

दिवानां देवतापूजा रात्रौ शान्तिं समाचरेत्।

नद्यान्त पर्वतेचैव तटाके वन मध्यके।

दूरेच देवतास्थाने रात्रि पूजां न कारयेत्।

दैविकं आर्षिकं सैद्धं स्वयंव्यक्त महालयम्।

सततं पूजयेद्देवं सदाकालं प्रपूजयेत्।

तस्करे म्लेच्छ पाषण्डैःकलहादि समुद्भवे।

स्पृश्यतेचाऽङ्गहीनेच दिवारात्रौ न पूजयेत्। (मार्कण्डेयं)

परत्वादिषु लोकेष्वपि पाञ्चरात्रपूजनंश्रेष्टं

वासुदेवादि मन्त्रैश्च मत्स्याद्यैः केशवादिभिः।

पुष्पाणिदत्वा ध्यात्वा च तत्तन्मूर्तिं यथा तथा।

वैकुण्टे सत्यलोकेच क्षीराब्धौ रविमण्डले।

पाताळादिषु लोकेषु पाञ्चरात्रेण पूजयेत्।

यत्र अष्टाक्षरसंसिद्धाः महाभागो महीयते।

तत्र न सञ्चरिष्यन्ति व्याधि दुर्भिक्ष तस्कराः।

भक्ति युक्त स्वभावेन कुर्याद्देवस्य पूजनम्। (परम सम्हिता)

देव दर्शन विधिः

आपीठान्मौलि पर्यन्तमवलोख्य हरिं विभुम्।

उपेत्यायतनं विष्णोः प्रणिपद्य ततस्ततः।

परिस्थुत्यच देवेशं प्रणम्य आत्मानमर्चयेत्। (शाण्डिल्यं)

चतुष्काल पूजनेषु समयाः

प्रातर्माध्यन्दिने सायं त्रिकालञ्च यथाक्रमम्।

प्रातः काले निशीतान्ते चतुःका5लःप्रकीर्तिताः। (नारदीये)

क्षुद्र पूजायां कालः

एक कालेच मध्याह्ने क्षुद्रकं तत्प्रकीर्तितम्।

उत्तमादिषुदेवेषु त्रिकालं पूजयेत्सदा। (कपिञ्जलं)

मन्दिर प्रवेश काले कर्तव्य नियमाः (१)

कवाटमुद्घाट्य ततो वायु मन्त्रेण पद्मज।

साम्नादेवव्रतेनाऽन्तः प्रविशेद्दक्षिणाङ्घ्रिणा। (पाद्मे)

मन्दिर प्रवेश काले कर्तव्य नियमाः (2)

शङ्खध्वनि समोपेतं दुन्दुभिः पटहस्वनैः।

वादिबृंदोत्थितोश्चापि नाना वाग्भिर्महामते।

महाजयजयाऽऽरावैः पुनःपुनः उदीरितैः।

प्रभोद् लक्षणस्तोत्रैः उत्थाप्य शयनेस्थितः।

द्वारमासाद्य तत्रस्थो दशादिग्भंद् पूर्वकम्।

अवकुण्ठ्याऽथ तर्जन्या मन्त्रं कवचमुच्चरन्।

स्थितेवा कल्पिते तत्र पूजयेद्बलि मण्डले।

सर्वं खगेशपूर्वंतु परिवाराभिचाच्युतम्।

मनसा प्रणवेनाथ पुष्पमादाय कीर्तयेत्।

समस्त परिवाराय अच्युताय नमो नमः।

वास्तुपुरुष अन्यांश्च समभ्यच्र्य यथा क्रमम्।

मूल मन्त्रेण सांगेन निरंगेनाऽथवायथा।

न्यासं कृत्वाऽथवाच्छाद्य हस्त तालं हृदा तथा।

मूलमन्त्रेणचोद्घाट्य कवाटं नेत्र मन्त्रतः।(वासिष्टे)

<u>उत्तमादि त्रय गेहेषु कवाटोद्घाटन मन्त्र भेदाः</u>

उत्तमत्रय गेहेषु द्वारत्रय कवाटकम्।

उद्घाटयेत्ताक्ष्य नाम्ना देशिकः स्वयमेवहि।

मध्यम त्रय गेहेषु शान्त मन्त्रेण पद्मज।(ओं शान्ताय नमःइति)

अधमत्रय गेहेषु द्वारमेवं पृथक् पृथक्।

उद्घाटयेद्वायु नाम्ना देशिको मन्त्र वित्तमः।

द्वाराण्यन्यानि सर्वाणि ब्राह्मणः परिचारकाः।

उद्घाटयेन् मुक्तनाम्ना नशूद्रश्चकदाचन। (पाद्मोद्भवे -चन्द्रिकायां)

ताळत्रय कालानि

प्रबोधने कुम्भदीपे पात्रादिस्थापने कृते।

आह्वानार्थं बोधनार्थं ताळत्रयमथाचरेत्(विष्णुतत्वं)

मनसा फल समर्पण क्रमः

मनसा गुरुवंशंच तदाज्ञां मानसीमथ।

शिरसा धारयेत्स्वेष्टं फलं संकल्प्य चेतसा।

देवाय तं निवेद्याऽथ यागागारस्य मध्यतः।

प्रासादं विग्रहं कृत्वा वर्म मन्त्रं सविग्रहम्।

तज्जीवं भगवन्तं च ध्यात्वा याग गृहं ततः। (ईश्वरे)

असन्निधेय प्रासादे मन्त्र गृह वर्णनम्

आसाद्य कल्पयेन्मान्त्रं गृहं तदधुनोच्यते।

मूलमन्त्रं पुराध्यात्वाब्रह्मवत् सर्वगं ततः।

विदिक्षु दिक्षु मध्येच ज्वलन्तं भानुकोटिमत्।

हृन्मन्त्रंच तदन्तस्यमाक्रम्याऽखिलात्मना।

शिरोमन्त्रं च तन्मध्ये ब्रह्म नाडी स्वरूपिणम्।

स्तम्भ भूतंतु विश्वस्य संचारत्ववदुज्वलम्।

शिखामन्त्रंच सर्वस्माद्बहिः प्राकारवत् स्थितम्।

वर्ममन्त्रंतु कर्मात्मा परमात्मानुवेधयेत् ।

गवाक्षद्वारभूतंच नेत्र मन्त्रंच भावयेत्

स्फुरद्वह्विस्पुलिङ्गोर्मि सहस्त्र परिराजितम्।

सर्व विघ्नप्रशमनं बहिरस्त्रंच भावयेत्।

एवं मान्त्र गृहं ध्यात्वा ततो द्वारंतुचेतसा। (पारमे)

विश्वरूप काले देवाय दर्शनीय द्रव्याणि

प्रथमं पञ्च गव्यञ्च द्वितीयं घृत दर्शनम्।

तृतीयं क्षीर कुम्भञ्च चतुर्थं गज दर्शनम्।

पञ्चमंचाऽष्टधान्यञ्च धेनुवत्सञ्च षष्टकम्।

सप्तमं कन्यकानांतु श्वेताश्वञ्चाऽऽष्टकम् भवेत्।

नवमं दर्पणंप्रोक्तं दशमं कृष्णमर्कटम्।

एकादशंतु भक्तानां द्वादशं नृत्त गीतकम्।

यजमानाः त्रयोदश्यां दर्शयित्वा यथाक्रमम्। (अनंताख्यं)

विश्व रूप काले घटेतीर्थाऽऽहरण विधिः,नियमंच

परिचारैस्तु कर्तव्यं सचेल स्नान पूर्वकम्।

जलकुम्भं समादाय सर्वाऽलंकार शोभितम्।

उत्तमंतु गजारूडं मध्यमं नरमूर्धनि।

छत्र चामर संयुक्तं नृत्त वाद्य समन्वितम्।

वीथिः प्रदक्षिणं कुर्यात् मण्डपंच प्रवेशयेत्। (परम संहिता)

तत्तीर्थे उत्तमादि भेदाः,नियमाश्च

उत्तमं तु नदीश्रेष्टं मध्यमं च तटाकयोः।

अधमं कूपपानीयं यथा संभवमाचरेत्।

परिचारैश्च कर्तव्यं स्नानान्तो नियत मानसः।

दौतवस्त्र उत्तरीयञ्च ऊर्ध्वपुण्ड्रैरलंकृतः।

घटं प्रक्षाळ्यमनुना सौरभींच प्रदर्शयेत्।

जलं पुरुषमन्त्रेण संशोष्यगुरुरात्मवान्।

अग्नि मन्त्रेणगंधांच चंद्र कोटि समप्रभम्।

निवृत्तिमन्त्रं तध्यायेत् पुण्य तीर्थानि चिंतयेत्। (सनके)

<u>एतद् विश्वरूपस्य अवश्यकत्वम्-निवेदन द्रव्याणिच</u>

गो दर्शनंच विधिवत् कारयेत् देवसन्निधौ।

गोक्षीरं शर्करायुक्तं नवनीतं सुवासितम्।

निवेदयित्वा देवाय अर्चकाय प्रदापयेत्। (जयोत्तरे)

विश्व शक्तियुतं देवं जितंताप्रमुखैः स्तवैः।

स्तूयाद्गाथाभिरन्याभिर्गोक्षीरं शर्करायुतम्।

दध्यन्नानि निवेद्याथ नित्य पूजामुपक्रमेत्। (श्रीः)

<u>विश्वरूप दर्शने फलानि</u>

विश्वरूपंच यः पश्येत् देवस्य पुरतः स्थितः।

दशजन्मार्जितं पापं तत्क्षणादेव नश्यति।

इत्येवं दर्शनात्पुण्यं महा पातक नाशनम्। (वासुदेवे)

<u>प्रच्छन्न पट अवश्यकत्वं तत्कालंच</u> (1)

अर्चनादि क्रिया काले प्रच्छन्न पटमुत्तमम्।

कल्पयेद्देवदेवस्य दृष्टिदोष विनिवृत्तये।

निर्माल्य उद्वासन काले स्नानान्तेतु विशेषतः।

हविरादौच निरुक्तान्ते कुर्याद्यवनिकां सुधीः। (परम संहिता)

<u>प्रच्छन्न पट अवश्यकत्वं तत्कारणंच</u> (2)

प्रच्छन्न पट संयुक्तं यथा कालंसु पूजयेत्।

पापरोग मथि ब्रष्टान् नास्तिकान् श्रुति दूषकान्।

कृतघ्नश्च पतितश्चैव विष्णुनिन्दापरस्सदा।

गुरुनिन्दापरश्चैव पाषण्ड समयस्थिताः।

असत्पङ्गु रपस्मारो पापरोगोपवेशिनः।

मूकंच बधिरंचैव पूजाकाले नदर्शयेत्। (पारमे)

<u>प्रच्छन्न पट अवश्यकत्वं तत्कारणंच</u> (3)

स्वस्थाने पूजनेकाले प्रच्छन्न पटमुत्तमम्।

पूजा कालेतु देवानां पुष्पाऽलंकरणे तथा।

मुद्राकालेतु सर्वत्र हेम रत्न समर्पणे।

एवमेतेषु कालेषु पटमाच्छाद्य वाससा।

पूजाकाले स्नान काले नैवेद्य वस्त्र भूषणं।

यानादिरोहणे कृत्वा प्रच्छादन पटं न्यसेत्। (विहगेन्द्रे)

प्रच्छन्न पटंविना पूजन कालानि

आस्थान मण्डपे प्रच्छन्नंतु पटं त्यजेत्। (श्री)

कुम्ब मण्डल होमेतु पुण्याहं दान रक्षकम्।

नद्यादिस्नान कालेच प्रच्छादनपठं विना। (कपिञ्जले)

निर्माल्य विसर्जने वैशेषिकम्

दीपात् संदीपयित्वातु निर्माल्यमपकृष्यच।

विष्वक्सेनाय दत्वातु सम्माज्र्याक्षौदवारिणा। (पौष्करे)

अन्यत्र

न भारं मेरुशिखरं न भारं सप्तसागरम्।

रात्रौपूजित निर्माल्यं प्रभाते भारमद्भुतम्। (विहगेन्द्रे)

अन्यत्र

सेनेशं मनसा ध्यायेद्याग विघ्नोप शांतये।

ततः स्व देह शुद्ध्यर्थं यागद्रव्याऽऽलयस्य च।

शुद्ध्यर्थं पाकशालायाः पुण्याहं वाचयेद्गुरुः। (श्रीः)

पुण्याहवाचन कालानि

द्रव्य शुद्धिः स्थल शुद्धिश्च आत्मशुद्धिश्च कर्मकम्।

चतुश्शुद्धिश्च मन्त्राणां पुण्याहञ्चाऽपि कारयेत्।

पुण्याह वाचन कालेतु कोष्टधारण माचरेत्।

कोष्टधारण हीनेतु सर्व कर्मांविनश्यति।।(पुरुषोत्तमं)

पुण्याहस्य अर्चनीय द्रव्याणि।

अस्त्रमन्त्रेण धरणीं संप्रोक्ष्य प्रथमं गुरुः।

पुण्याहं वाचयेत् पश्चात् ब्राह्मणैःसह देशिकः।

स्थण्डिलं हस्तमात्रंतु मेखला त्रय सम्युतम्।

वृत्तंवा चतुरश्रंवा कृत्वाकर्म समाचरेत्।

पुण्याहं शान्ति होमंच अङ्कुरादि प्रतिष्टकम्।

श्वेतं हरिद्रा कुङ्कुमंच अक्षताणि समर्चयेत्। (विष्णु संहिता)

पुण्याहस्य कालभेदेन तीर्थ भेदाः

प्रातःकाले हरिद्रांच मध्याङ्हे गन्ध तोयकम्।

रात्रौ शुद्धोदकंचैव पुण्याहं त्रिविधं स्मृतम्। (वासिष्टे)

पुण्याहस्य पूर्वकार्याणि

चरणं पवित्रमुच्चार्य महींप्रक्षाळ्य वारिणा।

विष्णोरराट मन्त्रेण दर्भैः सम्मार्जयेदनु।

गन्ध द्वारेति मन्त्रेण गोमयेनाऽनुलिप्यच।

आप उन्दन्तु मन्त्रेण सुधाचूर्णैरलंक्रियात्।

देवस्यत्वेति मन्त्रेण विकिरेदक्षतान् क्षितौ।

ग्रीष्मोहेमन्त मन्त्रेण धान्यपीठं प्रकल्पयेत्।

शंनोदेवीति मन्त्रेण शतपत्रं लिखेत् सुधीः।

धन्व नागेति मन्त्रेण दर्भैरूध्वं परिस्तरेत्।

तस्मिन् लक्षण संयुक्तं कनकादि विनिर्मितम्।

रत्नं स्वर्णं नालिकेरमाम्र मश्वत्थ पल्लवम्।

विनिक्षिप्यच तोयेन गन्धेनापूरयेत् घटम्।

चन्दनाक्षत मालाभिर्भूषणैश्चाप्यलंक्रियात्। (श्री-ईश्वरेच)

पुण्याह जलस्य प्रोक्षणे मन्त्र भेदाः

पुण्याहं स्वस्ति ऋqद्धच संवाच्य सह मूर्तिपैः।

प्रोक्षयेच्छतधारेण स्थानानीत्यादिकेनच। (पारमेश्वरे)

अकृत्वा यदि पुण्याहं कृत्वा कर्म निरर्थकम्। (श्री)

वासुदेवाख्य पुण्याहंवाचयेद्देवसन्निधौ।

मानुषं यदि पुण्याहं मंदिरं शून्यतां व्रजेत्। (वि -तिलके)

त्रिकरण शुद्धि विषये

मानसं ध्यानमित्युक्तं कायिकं कर्मचोच्यते।

वाचिकं स्वस्तिमेवोक्तं त्रिविधं शुद्धि रुच्यते। (संवर्त)

त्रिकरण तपो विषयं

कायेनमनसा वाचा तपस्त्रिविधमीरितम्।

गुरुदेव द्विजः प्राज्ञः पूजाशौच मथार्जवम्।

ब्रह्मचर्यमqहसाच तपश्शरीरमुच्यते।

अनुग्रहपरा वाची भूतानुभयकारिता।

स्वाध्यायो वेदमन्त्राणां कथितं वाचिकस्तपः।

निष्टा ब्राह्मणि संतोष सौर्य भावो मनःशुचिः।

ज्ञानाख्येन्द्रिय वश्यंच तत्प्रोक्तं मानसस्तपः।(वि-ति)

लोचन मन्त्र जपेन शुद्धि विषयः

वासुदेवाभिदानं तु प्रागुक्तंच समाश्रयेत्।

ततो लोचनयुग्मेन स्तब्देन मुनिपुङ्गवाः।

जपन् लोचन मन्त्रं तु पश्येद्यागोपयोगिनम्।

सम्भारमखिलं तेन द्रव्यसङ्गो विशुध्यति।(ईश्वरे)

पञ्च शुद्धि विषयः

पूजाकाले पुराकुर्यात् पञ्चशुद्धि गुरूत्तमः।

स्थानशुद्धि पात्रशुद्धि बिम्ब शोधनमेवच।

आत्मनो भूत शुद्धि च मन्त्रवर्णस्तथा रमे।(श्रीः)

शुद्धि विषयः बृहद्धूम्रे-4-7अ

कीर्तनेन वचस्शुद्धिर्जायते वार्षिकी प्रिये।

बिंबस्य दर्शनात्विष्णोश्चाक्षुशी शुद्धिरीरिता।

श्रवणाद्यशसो विष्णो श्रोत्राणां शुद्धिरीरिता।

नत्याच शिरसा शुद्धिस्त्वचसा साष्टाङ्गवन्दनात्।

उत्तीर्णधूप पुष्पाद्यैर्नासा शुद्धिर्वरानने।

करयोर्मार्जनादिभ्यः प्रादक्षिण्न्यात्पदैरपि।

एकादश्याम् सकृत् कृत्वा सर्वेषां देहवासिनाम्।

आजीवनांतं या शुद्धिस्साशुद्धिर्जायते ध्रुवं।

अन्यत्र

पवमानस्य मन्त्रेण कृत्वा संमार्जनं तथा।

गर्भगेहं चतुर्वक्र लक्ष्मी मन्त्रेण लेपयेत्।

देहशुद्धिः स्थानशुद्धिः द्रव्य शुद्धिरनंतरम्।

मन्त्रशुद्धिः बिम्ब शुद्धिः पञ्चशुद्धिरितीरितम्। (पाद्मे)

शरीरे पञ्चभूत तत्व विषयम्-1

पादादिजान्वन्तंभूमि जानू कट्वन्तरं जलम्।

हृत्कट्योरन्तरेतेजो वायुर्नासा हृदन्तरे।

व्योमनासाशिरोर्मध्ये एवंदेह व्यवस्थितः। (शौनके)

शरीरे पञ्चभूत तत्व निरूपणम् 2

आजानुतो भुवस्थानं आकठ्यां पयसस्मृतः।

आनाभिः तेजसां स्थानं नासान्तं मारुतस्तथा।

नासिकोपरि मूर्धान्तं नभस्थानं प्रकीर्तितम्। (ल- तन्त्रे,श्रीः)

द्रव्याणां द्वात्रिंशद् शुद्धि विषये

पञ्च शुद्धि प्रवक्ष्यामि देवदेवस्य शार्ङ्गिणः।

स्नानाचमन शौचेन प्राणायामेन देशिकः।

अन्तर्बहिश्शरीरस्य साधकः सह शुध्यति।

प्रसन्न ज्ञान संतोषात् **मानसं** शुद्धिरुच्यते।

सत्यं भूतहितंचैव प्रियाऽऽलापस्तथैवच।

वचसांशुद्धिरुद्धिष्टो साधकस्य विशेषतः।

मार्जनं लेपनंचैव प्रोक्षणंचाऽक्षतार्पण्म्।

स्थानशुद्धिरिति प्रोक्ता द्रव्यशुद्धि रिहोच्यते।

तिन्त्रिणी फल तोयेन ताम्रं हेमंच शोधयेत्।

गृहधूमेन कल्केन शान्ताङ्गारेण राजतम्।

शङ्खं शुक्तयोश्च शुद्धिस्तु तुषतक्रेण देशिकः।

मृज्जलेन द्विजः श्रेष्ट फलपात्रं विशुध्यति।

अत्युष्णेन तु तोयेन दीपपात्रं विशुध्यति।

मृण्मयाणांच पात्राणां दाहनाच्छुद्धिरुच्यते।

वस्त्राणां धूपनात् शुद्धिः पठादीनां तथैव च।

शैलजं शर्करा चूर्णजलेन च विशुध्यति।

रत्नजा मणिनाचैव क्षाळणात् कुशवारिणा।

प्रोक्षणाद् द्विज जातीनां पुष्पाणांचैव शुध्यति।

दीपस्यौज्वलनात् शुद्धिः स्तम्बानां क्षाळणात्तथा।

प्रभूतानांच दारूणां तक्षकाच्छुद्धिरुच्यते।

वेदादिमादिमं कृत्वा नमस्कार प्रदक्षिणम्।

मन्त्रं मन्त्रेप्रयुञ्जीत तन्मन्त्र शुद्धिरुदाहृतः।

कुशेन गन्ध तोयेन बेर शुद्धिरुदाहृतः।

निर्दोषतोयमादाय नव पात्रेषु पूरयेत्।

नवपात्रेण पूतेन तोयशुद्धिर्भविष्यति।

द्रव्य शुद्धिरिति प्रोक्तासंक्षेपेण द्विजोत्तम। (कपिञ्जले)

(2) अन्यत्र

देह शुद्धिपादतीर्थं स्नान शुध्यादि तीर्थयोः।

द्रव्य शुद्धिश्च पुण्याहं मन्त्र शुद्धिः गुरुर्मुखः।

पादशुद्धिस्तु प्रक्षाळणं ताम्बूलं आस्य शुद्धयोः।

करन्यासं कर शुद्धिस्तु अङ्गन्यासादि भूत हृत्।

तत्वन्यासं रोग शुद्धिः द्वादशाक्षर चिन्तकाः।

अग्निंच स्थलशुद्धिञ्च पात्र शुद्धिञ्च तिन्त्रिणी।

अर्चकस्यच दीक्षायाः बिम्बशुद्धिस्तु मन्त्रकः।

दान शुद्धिश्च द्रव्याणां नैवेद्यं शुद्धि मुद्रयोः।

दीपशुद्धिः घृतेनैव एलादिः द्रव्यतीर्थयोः।

दृष्टिदोषं घटदीपेन नीराजनं ज्ञान शुद्धयोः।

भुक्तिशुद्धिश्च गायत्रिया प्रेत शुद्धिश्च शान्तयोः।

वाद्यादि ताल शुद्धिस्तु घनिका विप्र कन्ययोः।

स्पर्शदोषस्तु कैंकर्यं पापशुद्धिस्तु वन्दनात्।

क्षौरे स्नान पुनस्नानात् उत्सवंच तु पावयोः।

अष्टाqवशति शुद्धिस्तु तत्तत्कर्मानुसारतः।

अन्यथा कारयेन्मोहात् तत्पूजा निष्फला भवेत्। (परम संहिता)

मात्रायाः लक्षणे

जानुं प्रदक्षिणं कृत्वा न द्रुतं न विळंबितम्।

क्रियतेचाङ्गुली पूर्वा सा मात्रा परिकीर्तिताः। (पारमे)

रेचकपूरकादीनां मात्रा प्रमाणानि

तदा द्वादश मात्राभिः क्रियते रेचकास्तथा।

तस्माद्विगुण मात्राभिः क्रियन्ते पूरकं तथा।

तस्य त्रिगुणमात्रेण क्रियते कुम्भकं तथा।

एवमायाम पूर्वंतु योगंवा योगमुत्तमम्। (योगशास्त्रे)

श्रोत्राचमन लक्षणंच फलानिच

गंगा च दक्षिणे श्रोत्रेनासिकायां हुताशनः।

उभयोःस्पर्शनेचैव श्रोत्राचमनमिष्यते।

अग्निस्तीर्थाश्च देवानां वारुणीचैव वायवी।

विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठंतु शुद्धयति।

सर्वकाले हुताद्यादौ श्रोत्राचमनमिष्यते। (सारसमुच्चये)

प्राणायाम पदनिरुक्तिः

प्रकारं पापनाशंस्यात् णकारं नाडिबंधनम्।

यकारं यामविद्यानां मकारं मयिचिंतनम्।

प्राणायाममिति प्रोक्तं मोक्षमार्गैक कारणम्। (विहगेन्द्रम्)

रेचकादि प्रणायामस्य अधि देवताः-तत्फलानिच

ब्रह्म विष्णु महेशाद्याः रेचकाद्यधि नायकाः।

रेचकैः शोधयेत्पापं पूरकैरपि दाहयेत्।

कुम्भकैःस्तम्भयेद्व्ह्निं एवं पापं विशोधयेत्। (श्रीः)

भूतशुद्धेरवश्यकत्वम्

भवेत्प्राणजयःपुंसः प्राणायामः स उच्यते।

ततस्तु काय शुद्ध्यर्थं वर्णं भौमादि विन्यसेत्।

भूत शुद्धिं श्रुणु मुने यथावदनुपूर्वशः।

पृथिव्यप्तेजोऽनिलाकाशं शरीरं भूत पञ्चकम्।

इन्द्रजालोपमं विद्धि ज्ञानाद्यैरूर्जितं गुणैः।

मलिनंचाऽस्वतन्त्रंच रेतो रक्तोद्भं क्षयि।

यावन्न शोधितं सम्यग्धारणाभि र्निरन्तरम्।

तावदेतदयोग्यंस्यात् मन्त्र न्यासादि वस्तुषु। (पारमे)

भगवतः विराजमान मण्डपस्य वर्णनम्

तुङ्गं मङ्गल सम्युक्तं मणिकुट्टिम भूषितम्।

सौवर्णैः बहुभिःस्तम्भैर्मणि विद्रुम भूषितैः।

उपेतं दीपिकाजालैर्जात रूपमयिर्वृतम्।

विचित्राभिः पताकाभिस्तोरणैरुप शोभितम्।

मणिकिङ्कि्णि जालैश्च वितानैः क्षौमकल्पितैः।

विराजमानंसर्वत्र मणिपीठ विराजितम्।

तस्य मणडपरत्नत्रयस्य मध्ये परम भास्वरान्।

पद्मरागामयैःस्तम्भैश्चतुर्भिरुपशोभिताम्।

मुक्तामय वितानेन युक्तां रत्नचतुष्किकाम्।

वैडूर्यघटितोत्तुङ्ग वेदिकां दीपिकायुताम्।

एवं कर्तुमशक्तंचेदेवं ध्यायेत पूजकः। (अहिर्बुध्न्ये)

श्रियाः मानसाराधने प्रार्थना विशेषः

स्वागतं पद्मपत्राक्षी सन्निधिं भजमेऽम्बुजे।

गृहाणमानसीं पूजां यथार्थ परिभाविताम्।

यत्राऽहं तत्रतत्वानि यत्राऽहं तत्र देवताः।

यत्राऽहं तत्र पुण्यानि यत्राहं तत्र केशवः। (ल-तन्त्रे)

पुरुष सूक्त आराधने मन्त्र निरुक्तिः

आवाहनं सहस्रेति पुरुषएवेदमासनम्।

एतावानिति पाद्यंस्यात् त्रिपादाऽर्घ्यं प्रकल्पयेत्।

तस्माद्विराडाचामं स्यात् यत्पुरुषेणाऽवगाहनं ।

तंयज्ञमिति स्तोत्रंतु तस्मादे यज्ञोपवीतकम्।

तस्माद्यज्ञाश्च गन्धंस्यात् तस्मादश्वेति पुष्पकम्।

यत्पुरुषंव्यदधो धूपञ्च ब्राह्मणस्येति दीपकम्।

चन्द्रमाइति नैवेद्यं नाभ्यां पुष्पाञ्जलिं क्षिपेत्।

वेदाहमिति ताम्बूलं धाताचेति प्रदक्षिणम्।

सप्तास्यादिति नमस्करं यज्ञेनेत्युद्वासनं क्रमात्।

षडासनानां नामानि

मन्त्रासनं यथोस्नानं अलंकारं तु भोजनम्।

यात्रासनं च शयनं षडैते देवतार्चनम्। (पाद्मे)

आचार्य निवेशन कूर्मासनस्य लक्षणे

कूर्मवच्चतुरः पादं शिरंचोध्वैव पञ्चमम्।

श्वेत वर्णं बृहत्कुक्षिं ताळत्रय समायतम्।

पीठं पञ्चाङ्गुल घनम् त्रिताळं विस्तृतं भवेत्।

तदासनस्य वृक्षाणां भेदाः

खादिरं चन्दनंचैव यज्ञ वृक्षेण कल्पयेत्।

रजतं ताम्रजं वापि तस्योपरि निवेशयेत्।

तदुपयोगानि फलानिच

जपहोमाऽर्चनाकाले प्राङ्मुखोवाप्युदङ्मुखः।

कूर्मासनगतो विप्रः जपहोमौ विशेषतः।

अश्वमेध फलं पुण्यं विष्णुलोके महीयते।

अन्यत्रकाले आसीने प्रत्यवायः

अन्यकाले च आसीने गुरूश्चबालकः।

कुक्षौव्याधि महारोगं भविष्यति नसंशयः। (वासिष्टे)

वंशासनादि भेदेन फलभेदाः

वंशासने दरिद्रंस्यात् पाषाणे व्याधि पीडनम्।

धरण्यां दुःखसन्तापं सौभाग्यं दारुकासने।

तृणासने यशोहानिः पल्लवैः चित्तविभ्रमम्।

कृष्णाजिने ज्ञान वृद्धिः मोक्षश्री व्याघ्र चर्मणि।

कौशेये तेजसां वृद्धिः कंबळे दुःखमोचनम्।

साधकानां सुखंदद्यात् चेलक्षौमासनद्वयम्। (योगशास्त्रे)

आचार्यस्य ऋजुकायत्व लक्षणम्

अर्चकोह्याचरेन्नित्यं वासुदेवार्चने रतः।

उपविश्याऽऽसने नित्यं स्वस्तिकादि यथारुचि।

बद्वाप्रागानन स्संयक् ऋजुकायस्समाहितः।

नासाग्र न्यस्त नयने दन्तैर्दन्तान्नसं स्पृशेत्।

रसनान्तालुविन्यस्य अथ बाहुद्वयान्वितः।

आकुञ्चित शिरोकुञ्चित् निबद्धान्योग मुद्रया। (पाद्मे)

योगपीठार्चने मूलभेरस्य कर्तव्य विधिः

मन्त्रपूर्वाः क्रियास्सर्वाः साधयन्तीप्सितं फलम्।

मन्त्रैराकृष्यते देवाः मन्त्रेणैव विसर्जयेत्।

बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठति।

योगपीठादिकं सर्वं मूल बिम्बे प्रकल्पयेत्। (परम संहिता)

अर्चनं योगपीठस्य मन्त्रन्यसनमेवच।

बिम्बे स्थिरे सदाकार्यं पूजारंभे चतुर्मुख। (पाद्मे)

आसीनादि बिम्भानांभेदेन योगपीठार्चनेनियमः

आसीनस्य शयानस्य कर्मबिम्बस्यवै रमे।

पीठकल्पन कालेतु स्मरेत् पद्मान्तमादितः।

ततोऽनन्तंस्मरेद्देवी सहस्रफण मण्डितम्।

यानारूडस्यबिम्बस्य पद्मात्ताक्ष्यं विचिन्तयेत्। (श्रीः)

श्रियादि देवीनां योग पीठार्चने वैशेषिकम्

श्रियादीनांतु देवीनां पीठमूलेतु कच्छपम्।

तन्मध्ये पन्नगादीशंऽस्यकोणेषु पद्मजे।

धर्मादीन् क्रमशो ध्यात्वा तदूर्ध्वेऽव्यक्त पंकजम्। (श्रीः)

अन्यत्र

विशेषोयं प्रवक्ष्यामि योगपीठे प्रकल्पनम्।

हरिं विना आश्रयादीनां ब्रह्मादीनां चतुर्मुख।

चण्डादि परिवाराणां भक्तानां पीठ कल्पनम्।

आधारादि चतुर्थ्यन्तं धर्मादिच चतुष्टयम्।

प्रकल्प्य पादरूपेण पीठं भद्रं प्रकल्पयेत्।

पद्मासनं ततोऽभ्यच्र्य मूर्तिं मन्त्रेण पूजयेत्। (वि-तिलके)

चतुर्विध आसनानां भेदानि लक्षणानि च

तुर्यादीनांतु तत्रैकं भावयेदासनंत्वथ।

तुर्यनाम आसनं पूर्वं कारणप्रणवान्वितम्।

सुषुप्तिर्नामा तद्याप्तऽव्यक्त पङ्कजम्।

स्वप्नः शेषादिपूर्वंतु बहिःपर्यन्तमासनम्।

क्षीरार्णवादितो भावादासनान्तं जाग्रदासनम्। (पारमे)

आसने पञ्च विधत्वम्

पद्मासनं च पद्मंस्यात् अनन्तं वृत्तमेव च।

सिम्हासने चतुष्कोणं षट्कोणं विमलासने।

योगासने त्रिकोणंच पञ्चासनमिति स्मृतम्।

तेषां पद्मासनस्य प्राशस्त्यं

देवानामपि सर्वेषां आदि पद्ममभूदितः।

तस्मात् सर्वदेवानां पद्मेनैवासनं भवेत्। (नारदीये)

तदासनानां फल निरूपणमाह

पद्मासनं तदा भाह्ये अनन्तासन माचरेत्।

विमलेत्वर्चना प्रोक्तं योगेचैव निवेदयेत्।

सिंहासने तथा क्रीडां पञ्चासनमिति स्मृतम्।

मन्त्रासने योग पीठं पद्ममन्यत्र चिंतयेत्।

ध्यायेन्मन्त्रासने ताक्ष्यं अनन्तं शयनासने। (श्रीः)

आसन भेदेन भगवतः ध्यान भेदाः

योगेस्थितं मण्डने च यात्रायां भोजने तथा।

स्नानेच सुखमासीनं शय्यायां शयनं विभुम्।

अन्यत्रचोपचारेषु स्थितं आसीनमेववा।(श्रीः)

स्वस्तिकासन लक्षणम्

वर्ण्यते स्वस्तिकं वामतलयोरुभयोरपि।

पूर्वोत्तरेजानुनी द्वे कृत्वाऽऽसनमुदीरितम्।

विन्यस्य दक्षिणेपार्श्वे सव्यं सव्ये तु दक्षिणे।

गुल्फंकृत्वा आसनं तच्च स्वस्तिकं कथ्यते बुधैः।

बद्धपद्मासनस्य लक्षणम्

आरोप्य ऊर्वोःचरणयोःतदङ्गुष्टद्वयं पुनः।

व्युत्क्रमेणैव हस्ताभ्यां गृह्णीयात्तदासनम्।

बद्ध पद्मासनं ज्ञेयं आसनेषु सुपूजितम्।(पाद्मं)

अभिवलजस्य(आचार्य स्थान) लक्षणम्

देवस्य दक्षिणे पार्श्वे आसने च समाविशेत्।

उदङ्मुखं पूर्व वलजेचाऽर्चयेत् क्रम योगतः।

दक्षिणे वलजे विप्र पूर्वाभिमुखतोऽर्चयेत्।

पश्चिमद्वारजो विप्र! दक्षिणाभिमुखोऽर्चयेत्।

देव प्राच्यां नदोषस्यात् अर्चकाणां नरोत्तमाः।(खगप्रश्ने)

आवाहन विधिः

आगच्छ पदमन्त्रेण मूलेमन्त्रेण हृत्कजाम्।

एवंतेजोमयंदेवं नाडी दक्षिण मार्गतः।

सर्वभूतरतं विष्णुं मन्त्रमूर्तिस्समागतम्।

समाहूयस्व मन्त्रेण पूजायास्याऽभिमुखं भवेत्। विहगेन्द्रे)

आवाहन निषेद देशानि

ऋषिभिर्मनुजैर्वापि भक्तियुक्तैः प्रतिष्टितम्।

तन्मूर्तौच स्वमन्त्रेण यजेदावाहनं विना। (ईश्वरे-पारमे)

अन्यत्र

नाऽऽवाहयेदेकभेरे सुरसिद्धाऽवतारिते।

ऋषिभिर्मनुजैर्वापि स्थापिते निश्चिते हरौ।

सुस्थितोऽभिमुखी भावःस्तदेवाऽऽवाहनं हरेः। (पाद्मे)

अन्यत्र

नरैराराध्य बिम्बेषु प्रत्यहं स्वहृदब्जकात्।

प्राग्वदावाहनं कुर्यादत्र तद्विग्रहस्थितान्। (सनके)

मूलभेरात् बिम्ब भेदेन आवाहन क्रम भेदाः

दीपयेद्बिम्बतोऽन्यत्र तस्मिन् पुष्पाञ्जलिं हरौ।

आगच्छ पदमन्त्रेण मूलमन्त्रेण हृत्कजात्।

प्रत्यहं कर्मबिम्भानां मूलबिम्भे हृदब्जगात्।

किञ्चिदावाहनं कार्यतत्रत्वेवं क्रमो द्विजाः।

मूलबेरे तु यत्तेजः षड्भागैकं तु कर्मणि।

कर्मबिंबांश षड्भागंपञ्चांशंतु उत्सवस्य तु।

तद्विम्बांश चतुर्भागं स्नानबिम्बमुदाहृतम्।

तद्विम्बस्य त्रिभागंतु बलिबेरमुदाहृतम्।

बलिबिम्ब द्विभागांशं तीर्थबिंबेन संयुतम्।

शय्याबेरं ततःकुर्यात् एकांशेन विधीयते।

तत्तत्कर्मावसानेतु पुनर्मूले नियोजयेत्। (नारायणे)

(षट् त्रिंशत् एकभागस्तु बलि कर्मार्चनादिषु।

एवं तेजोमयं देवं नाडी दक्षिणमार्गतः। (ईश्वरे)

आवाहनस्य विषय निरुक्तिः

ज्वलनस्सूर्यकान्तो यथा भाति दिवाकरात्।

तथाऽर्चकः प्रार्थनया मूलात् कर्मणि कौतुके। (श्रीः)

यथा सर्वगतोवायुं व्यजनेन महामते।

वृत्तिमभ्येति भगवन् आहूतस्तद्वदेवहि। (ईश्वरे-पारमे)

आवाहित देवस्य सान्निध्य काल नियमाः

आवाहनं द्विधा प्रोक्तं अचलेपि चलेपि च।

अचलेपूर्वमावाह्य पश्चादावाहयेच्छले।

त्रिकालमर्चनायुक्ते एकदाऽऽवाहनं चरेत्।

अन्यभेराऽर्चनायां तु विसर्जन मथाचरेत्। (पाद्मं)

अन्यत्र

त्रिमुहूर्तात् पुरा प्राप्तपूजने पुरुषोत्तमम्।

नोद्वास्य पूजनं कृत्वा ततोद्वासनमाचरेत्। (१)

त्रिकाल अर्चनायुक्ते एकदाऽऽवाहनं चरेत्।

अन्यभेरार्चनायांतु विसर्जनमथाचरेत्। (श्रीः)

आवाहनस्य वैशिष्ट्यम्

गृह्यतेऽग्ने यथाचाग्नि कुम्भेचैव यथाऽम्भसि।

ततो तेजोमयोदेवो तेजः किञ्चिच्च गृह्यते। (नारदीये)

अन्यत्र

गोरङ्गेषु समस्तेषु क्षीरं यद्यद्यद् व्यवस्थितम्।

दुग्धं स्तन मुखे दृष्टं तद्वदावाहनं भवेत्। (अनंताख्ये)

आवाहन विषये वैशेषिकत्वं

आवाहिते प्रतिष्ठायां अर्चा च जगतःपते।

नोद्वास्य सर्व पूजानां आवाह्य पुरतोऽर्चनात्।

त्रिकालं अङ्ग बिम्बेतु कर्मार्चादिषु स्वस्वपि।

आवाह्य पूजयेन्मूलात् विशेषेस्वपि कार्यतः।

तत्तत्कर्मावसानेतु पुनर्मूले नियोजयेत्।

यदन्यथा कृते पूजा सापूजा निष्फला भवेत्।

तस्मात्सर्वप्रयत्नेन मूलादावाह्य पूजयेत्। (विहगेन्द्रे)

एकभेर विषये

मूलबेरं भवेद्यस्य एकबेरं यथा भवेत्।

बेरेह्यावाहनमुद्वासं ध्रुव बेरं नकारयेत्। (विहगेन्द्रे)

अन्यत्र

मूलबेराद्यथा दीपं दीपान्तरं तथा।

उत्सवादिषु बिम्बेषु आवाह्यस्य यथा विधिः। (पाद्मे)

आवाहन मन्त्र निरुक्तिः

प्रणवद्वितयस्यांते तारिकाद्वय मुद्धरेत्।

ततः परमधामाचाऽवस्थिते मदनुग्रहा।

अभियोगागतेचेकतथैवाऽवतरेतिच।

इहाभिमत शब्दंच सिद्धिते इति च त्रयम्।

ततो मन्त्रशरीरे च तारस्तारा नमो नमः। (ल.तन्त्रे)

आवाहन मन्त्रमाह (जयाख्ये-35 अक्षराणि)

ओं ओं ह्रीं ह्रीं परम धामावस्थित मदनुग्रहाऽभियोगोद्यत

इहावतारे(इ)हाभिमत सिद्धिद मन्त्र शरीरे ओं ह्रीं नमो नमः (इति ल-तन्त्रे) 45 अक्षराणि)

(प्रथमं मूलबेरस्य एव धूपदीपांतं पूजनं- नतु अन्यत्र- तत्कृते प्रत्यवायदोष विधिः)

नीराजनांतिमं पूर्वं मूलबिम्बं समर्चयेत्।

ततःकर्मादि बिम्बानां मन्त्रवत्क्रमशो भवेत्।

अनच्र्य मूलबिम्बंवा समकालेन वारमे।

व्यत्यासेनच वा कुर्यात् पूजनं गुरुसत्तमः।

तद्दोष शान्तये देवि जपेन्मूलसहस्त्रकम्।

पुनःपूजां प्रकुर्वीत मूलार्चादिषु मन्त्रवत्। (श्रीः)

मन्त्रासने उपचार विषयाणि

आवाहनं आसनं च अर्घ्यं पाद्यं तथैव च।

मन्त्रन्यासं च मुद्रां च षण्मुद्रां च प्रदर्शयेत्।

आचामं पादशाठींच तिलदानं तथैवच।

मधुपर्कं मुखवासंच मन्त्रासनमिति स्मृतम्। (गारुडे)

मन्त्र न्यास विषये वैशेषिकम्

स्थिति न्यासो गृहस्थस्य सृष्ट्याख्यो ब्रह्मचारिणः।

मुमुक्षो संहृतिन्यासः एवं न्यासस्त्रिधा भवेत्। (अनिरुद्धे)

षडक्षरस्य स्थान नियमाः

मूध्र्नि वक्त्रेच हृदये नाभौ जान्वोश्च पादयोः।

षडक्षरस्य न्यासोयंसृष्टौ कुर्याद्विचक्षणः।

अष्टाक्षरस्य स्थान नियमाः

अष्टाक्षरस्य न्यासेतु नत्रे गुह्यं ततोऽधिकः

द्वादशाक्षरे स्थान नियमाः

द्वादशाक्षरस्य मन्त्रस्य मस्तके चतसृषु क्रमात्।

प्राच्यादि दिक्षुविन्यासस्त्वधिकः परिकीर्तिताः। (श्रीः)

त्रिपात्रस्थापन काले नियमाः

पाद्यं मध्ये दक्षिणेचाघ्र्यमाचमनीयकम्।

एवं त्रिपात्रं संस्थाप्य द्रव्याणि विनिवेशयेत्।

दक्षिणे जलकुम्भं स्यात् पुष्पगन्धादि पात्रयोः।

वामे गण्डूषपात्रंतु अग्रे नैवेद्य पात्रकम्। (विहगेन्द्रं)

तस्मिन् देवतानां विषये

अर्घ्यस्य विष्णु दैवत्वं पाद्ये च मधुसूदनः।

त्रिविक्रमश्चाचामे त्रि पात्रेषु समर्चयेत्। (वि-तिलकं)

पञ्चपात्राणांस्थापनकाले

पाद्यं मध्ये दक्षिणे अर्घ्यं वामेचाऽऽचमनीयकम्।

तत्पार्श्वयोश्च पार्श्वस्थान् स्नान शुद्धोदकस्तथा। (पाद्मं)

तस्मिन् क्षेपणीय द्रव्याणि

कुशाग्र मक्षतं पुष्पं फलं मलयजं तथा।

तिलान् सिद्धार्थ सहितान् यवानघ्र्यस्य भाजने।

तिलंदूर्वा विष्णुपर्णी श्यामाकं पद्म मक्षतम्।

पाद्य पात्रे षडेतानि द्रव्याणि विनिवेशयेत्।

एलालवङ्ग तक्कोल जाती कर्पूर चन्दनम्।

पुष्पाण्याचमनीयेच पात्रे द्रव्याणि कल्पयेत्।

गन्ध सर्वौषधीः रत्नफल बीजं कुशानिच।

तिलानिचाक्षतश्चैव दधि क्षीर घृतं तथा।

रजनी द्वादशाङ्गानि स्नानीय द्रव्यमुच्यते।

कोष्ठं माम्सी हरिद्रेद्वे मुरा शैलेय चम्पकाः।

वचाकच्छोर मुस्ताश्च सर्वौषधीति प्रकीर्तिताः।

तिलैश्च तुळसींचैव भवेच्छुद्धोदकं तथा। (पाद्मे)

तेषां देवतानां निरूपणमाह

श्री रघ्र्यास्य भवेद्देवी वागीशाचमवीयके।

पाद्यस्य पितरोदेवः स्नानीये वारुणस्तथा।

शुद्धोदकस्य शान्तिः स्यात् पात्रेष्वेतान् समर्चयेत्। (पाद्मे)

अर्घ्यादि पात्राणांलोह विषये

सुवर्णं रजतं ताम्रं कांस्यपात्र मथापिवा।

एवं पात्रमलाभेच मृत्पात्रं नूतनं क्रमात्।

अन्यानि लोहजं पात्रं तत्पूजा निष्फलं भवेत्। (विहगेन्द्रं)

अर्घ्यादीनां समर्पण विषये

अघ्र्यं शिरसि विन्यस्य पाद्यं पादतले न्यसेत्।

हस्ते आचमनं दध्यात् गन्धं कायानुलेपनम्।

पुष्पं तु मूध्र्नि विन्यस्य भोज्यं करतले न्यसेत्।

दीपञ्च नेत्रयोर्दध्यात् धूपं नासन्तिकेपि च। (अनिरुद्धं,पाद्मं)

आचमनीय समर्पण कालानि

शयनांतेचाऽर्चनांते होमांते बलिदानके।

स्नानांते भोजनांतेच चान्द्रायणेतथा।

मन्त्रासनादि कर्मांते होमाद्यान्ते विशेषतः।

क्रियाहीनाऽर्चनाहीने द्रव्यहीने शुद्धि हीनके।

तत्सर्वं पूरणार्थाय आचामं पूरयेत् क्रमात्। (पराशरे)

अन्यत्र

भोजनांते च वस्त्रस्य परिधाने तथाप्लवे।

जिह्वा निर्लेखनांते च सर्वत्रचाऽऽचमनीयकम्। (पारमे)

स्वयं व्यक्तादि आलय भेदेन अर्घ्यादिषु समर्पणे भेदाः

स्वयंव्यक्ते त्रिरर्घ्याणि दिव्ये सैद्धे तथैवच।

मानुषं च गृहार्चायां एकमर्घ्यं प्रदापयेत्। (खगप्रश्नं)

अर्घ्यादीनांसमर्पण काले मुद्रा विषयः

तुळस्याऽर्घ्यं हरेर्दध्यात् ज्ञानमुद्रागृहीतया।

तर्जनी मध्यमान्तस्तु तुळस्या पाद्यमर्चयेत्।

हस्त प्रक्षाळनाऽऽचामं गण्डूषं मुख शोधनम्।

उद्धरण्यां हरेर्दध्यात् पाद्याऽघ्येच तुळसी दळात्।

आसन उपचार भेदेन अघ्यादीनां समर्पणे भेदानि

दृश्यं स्पृश्यं तथा दृश्यं त्रिधाऽर्घ्यंपरिकल्पयेत्।

अलंकारासने दृश्यं स्पृश्यं स्नानासने तथा।

भोज्यासने मुद्राञ्च त्रिधाऽर्घ्यं प्रदापयेत्। (खगप्रश्ने)

मूल भेरादिषु पूजनस्य अन्यत्र पूजनस्य पात्र विशेषाः

मूलार्चा उत्सवं भेरं लक्ष्म्यादि पूजनं तथा।

न्यासपूजा यथोक्तञ्च अन्य भेरादिकं तथा।

पुण्याहं शान्ति होमञ्च बलिदानंच कुम्भयोः।

ताम्बूलं तीर्थ कालेच अङ्कुरं यागशालयोः।

परिवारं भक्त देवं च एक पात्रेण पूजयेत्।

एतानि नामदेयानि प्रणवं पूजयेत् क्रमात्। (ईश्वरे)

अर्घ्यादिषुतीर्थेन अर्चकः करशोधने प्रत्यवायः

पूजाकाले च मुद्राणां देवमावृत्य निर्गतः।

अन्येषु सर्व कालेषु स्वस्थानेषु नियोजयेत्।

विष्णु पादोदकं पीत्वा न क्षाळयेत् करम्।

क्षाळयेद्यदि मूडात्मा रौरवं नरकं व्रजेत्।

साधको स्नानहीने तु सर्वकर्माविनश्यति।

शास्त्र मन्त्र क्रियाहीने सर्वम् निष्फलितं भवेत्।

तस्मात्सर्व प्रयत्नेन कारयेत् शास्त्रवर्त्मना। (शाण्डिल्ये)

मधुपर्क विषयः

1-फलान्येलाफलं सर्पि शर्कराच मधून्यपि।

पञ्चानामपि संयोगात् मधुपर्कमिति स्मृतम्। (वि-तिलके)

(२)मधुपर्कं दधि घृतं मधुयुक्तमनंतरम्।

समस्तमेवमेकाङ्गं दधिवाऽपि निवेदयेत्। (पारमे)

(३)गोधूमतण्डुलैः पिष्टं शर्करा दधि दुग्दकम्।

पीड्याज्य मधुसंयुक्तं मधुपर्कमिति स्मृतम्। (हिरण्यगर्भे)

(४)मधु क्षीरंच दध्याज्यं मधुपर्कमिति स्मृतम्।

एकाङ्गं वा समस्तंवा मधुपर्कं न लोपयेत्।

एकैकं प्रस्थ मात्रंस्यात् तदर्धं वा निवेदयेत्। (पाद्मे-वि.तिलके)

कदळ्यादि नारिकेळंच सितामधुघृतं तथा।

द्रव्याण्येतानि संयोज्य पञ्चामृत घटे क्षिपेत्। (श्रीः)

मधुपर्क द्रव्याणां अलाभे,निवेदन मन्त्रंच

अलाभे मधु घृतादीनां दधिकेवलमेव वा।

अग्निमीळीति मन्त्रेण मधुपर्कं निवेदयेत्। (ल-तन्त्रे)

नवनीतस्य लक्षणे

तक्रंच निक्षिपेत्तस्मिन् अहोरात्रोषितादपि।

दध्यञ्च मधनं कुर्यात् उद्धवेत् नवनीतकम्।

नवनीतं गुळं श्रेष्टं एलंचामिश्रितं तथा।

नवनीतं रसंग्राह्यं विष्णुः प्रीतिकरं शुभम्। (वि-तत्वं)

हस्त मुख पाद शाठीनां लक्षणमाह

हस्त शाठी पाद शाठींच वामांसे धारयेद्बुधः।

अन्यथा धारयेन्मोहात् सापूजा निष्फला भवेत्।

शाठीमादाय हस्ताभ्यां द्विधा कृत्वा विचक्षणः।

भागमेकं हस्त शाठी हस्त देशस्थ वारिभुक्।

अन्य भागं पादशाठी पाद देशस्थ वारिभुक्।

शाठिका द्विविधेनैव शिरो देशस्थ वारिभुक्।

यथैव वाम पाश्र्वेच शाठी निक्षिप्यते बुधः।

तथैव दक्षिणे कर्णे पवित्रं धारयेद्बुधः। (सनातन संहिता)

श्रीवत्सादि अर्चणेषु स्थाननिर्णयः

प्रणवं कर्णिका मध्ये स्मरेद्वेदादिमब्जज।

तस्य द्वादश पत्रेषु श्रीवत्सादीन् समर्चयेत्।

वह्नि मण्डल पूर्वादि दिक्षु इद्रादीन् यथाक्रमम्।

अर्कस्य मण्डलेदेवी कुमुदादि पदेष्वमून्।

शङ्ख चक्रं गदां शार्ङ्गं वज्रं खड्गं तथाऽपरम्।

पद्मं मुसलमित्येतान् आयुधान् पुरुषाकृतीन्।

सोमस्य मण्डले पूर्वादिष्वष्टसु क्रमात्।

व्याप्तिं कान्तिं तथा तृप्तिं श्रद्धां विद्यां जयां क्षमाम्।

शान्तिं च शक्तिरष्टैताः स्मरेत् चामरधारिणीम्। (श्रीः)

श्रीवत्सादि अर्चणेषु आवरणनिर्णयः

स्मरेत्पत्राश्रितं सूर्यं शशाङ्कं केसरावणौ।

कर्णिकास्थं हुतभुजं ततो गन्धदिना यजेत्। (ईश्वरे)

श्रीवत्सादि अर्चनेषु एकभेर बहुभेर विषये वैशेषिकं

अर्चनाद्विविधाः प्रोक्ताः स्थावराऽस्थावरापरा।

एकभेर विधानेतु स्थावरार्चाः प्रकीर्तिताः।

कर्मार्चाया समाख्याता नित्यमस्थावरार्चना।

न कुर्यात्स्थावरार्चायां परिवारान् कथंचन।

अस्थावरेषु प्रयुञ्जीत परिवारान् यथा क्रमम्।

उभयत्र यथाशास्त्रं योग पीठं प्रकल्पयेत्। (सनत्कुमारे)

<u>मन्त्रासनादि पूजेषु घटिका(समय) निरूपणम्</u>

घटिकैकं भूत शुद्धिस्यात् घटिकाद्वय जपं तथा।

घटिकाद्वे भवेत्स्नानं घटिकार्धाऽर्चनं भवेत्।

नैवेद्यंच त्रिपादंस्यात् त्रिपादञ्चाऽग्निकार्यकम्।

घटिकाद्वे उत्सवञ्च घटिकैकञ्च नृत्त गीतकम्।

दीपान्तस्त्रीणि माप्नोति हविषः पञ्च नाडिकाः।

बल्यन्तं सप्त नाडीस्यात् नृत्तानां नव नाडिकाः।

एवंच नित्य पूजायां देशिकः तन्त्र पारगाः। (पारमेश्वरं)

<u>पादुकादीनां देवता निर्णयमाह</u>

पादुकायं अनन्तं च सेनेशं शिवदिक्स्थतं।

अग्रे देवाय पक्षीन्द्रं गन्ध पुष्पादिभिर्यजेत्। (वि-तिलके)

<u>पादुका समर्पण कारणमाह</u>

आसनं गन्तुमीशस्य पादयोः पादुकां न्यसेत्। (वि-तिलके)

स्नानासन प्रार्थना

स्नान कालस्त्वयं प्राप्तः तवेच्छा वर्तते यदि।

अभ्यङ्गयित्वा देवेश सुस्नानं कर्तुमर्हसि।

सपादपीठमपरं शुभं स्नानासनं महत्।

आसादयाशुस्नानार्थं मदनुग्रहकाम्यया। (पाद्मे)

अन्यत्र

देवदेव सुरा सिद्धाः तीर्थानिच महर्षयः।

त्वत्सेवार्थंमिहायातान् स्नानानेतान् कृतार्थच।

सुस्नानो भव देवेश मन्त्रसंभावितांबुभिः।

आसादयासुस्नानार्थं मदनुग्रहकाम्यया। (विष्णु तत्वे)

स्नानासन (सांस्पर्शिक) उपचाराणि

तैलं च दंतकाष्ठं च बिल्वाऽऽमलक चूर्णकम्।

हरिद्रामलकं वस्त्रं गन्धमाल्यानु लेपनम्।

यज्ञोपवीतं भूषां च आयुधानि तथैव च।

पादुकाऽऽवाहनं चैव सांस्पर्शिक मथोच्यते। (जयाख्ये)

स्नपनस्य अर्थ विशेषः

स्नकारं सर्व सिद्धिस्यात् पकारं पाप नाशनम्।

नकारं नर तेजस्यात् स्नपनं नाम उच्यते।

अभिषेक पद् निरुक्तिः

अकारं अतिरूपं स्यात् भकारं भाग्य वर्धनम्।

षकारं षड्रसोपेतं ककारं कर्म सिद्धिदम्।

अकारञ्च भकारञ्च षेकारञ्च ककारकम्।

अभिषेकमिति प्रोक्तं धर्म कामार्थ मोक्षदम्। (परम संहिता)

स्नपनस्य फलं

यथाव्याधिगतं देहं औषधेन विनश्यति।

तथा बिम्बगतं दोषं स्नपनेन विनश्यति। (विष्वक्सेनं)

स्नपनकाले कूर्च लक्षणे

द्वात्रिंशदुत्तमं प्रोक्तंमध्यमं षोडशं भवेत्।

अधमंचाऽष्टमं प्रोक्तं कनिष्टंपञ्चमं स्मृतम्।

कलशानां त्रिभिःकूर्चं कारयेद् द्वादशाङ्गुलम्। (वासिष्टे)

कलशानां लक्षणमाह

सौवर्णं राजतं ताम्रं मृण्मयं वा यथावसु।

कलशालक्षणोपेताः पक्व बिल्वफलोपमाः।

अच्छिद्रास्वनवन्तस्य काळमण्डल वर्जिताः।

द्रव्य कुम्भाः द्रोणपूर्णाःतदर्धेनाऽथवाऽथवा।

पादेन कलशाशिष्टाःपूतावार्याऽऽढकमेववा। (पाद्मं)

दंतकाष्टस्य लक्षणमाह

दंतकाष्टं ततो दध्यात् खदिरोदुम्बरं तथा।

चूतदण्डेनदेवस्य दंतधावन माचरेत्।

काष्टेन देववदने सव्यादारभ्य पश्चिमम्।

शोधनार्थंतुदंतानां दर्शयित्वा ततःपरम्। (पारमे,वि-तिलके)

घृतारोपण विधिः

देवस्यपुरतस्थाप्य पात्रंलोह विनिर्मितम्।

घृतेनापूर्य तत्पात्रंप्राग्वत् संस्कृत्य देशिकः।

उभाभ्यांचैव हस्ताभ्यां दूर्वामादाय मूलतः।

घृतेनिमज्यचाग्राणि देवदेवेषु सेचयेत्।

ततस्तु कण्ठपार्श्वेतु ततोदेवस्य मूर्धनि।

पाणिप्रक्षाळनंकुर्यादन्तरांतरयोगतः।

दूर्वाभेदस्तथा प्रोक्ताः घृतारोपण कर्मणि।

हस्तव्यत्यास मार्गेण घृतारोपणमाचरेत्। (पाद्मे- पारमे)

स्नानसने मन्त्र विषयाः

स्नानासनप्रार्थनंच उत्तिष्ठ ब्रह्मणस्पते।

स्नानासनं प्रवेश्याऽथ भद्रंकर्णेत्रृचस्तथा।

तद्विष्णोरिति मन्त्रेण दंतधावनमाचरेत्।

इषेद्वोर्जेतिवै मन्त्रं जिह्वानिर्लेपनंतथा।

शन्नोदेवीति मन्त्रेण गण्डूषंच समाचरेत्।

पिशंग पृष्टि मन्त्रेण मुखमार्जन माचरेत्।

दधिक्राविण्णेति मन्त्रेण मधुवातेतिवै तथा।

मधुपर्कं प्रदातव्यं दधिक्षीरमधु दध्याज्य शर्करैः।

वामदेव्यमिति मन्त्रेण अभ्यङ्गंच समाचरेत्।

विष्णोर्णुक मन्त्रेण मौलौ आमलकं लिपेत्।

नते विष्णुरिति मन्त्रेण आमलक स्नान माचरेत्।

देहशोधे हरिद्रां च पञ्चगव्यं च मेव च।

कलश स्नपनं चैव पूर्णकुम्भाऽभिषेचनम्।

नारायणं च तद्विष्णोः नतेविष्णोस्तथैवच। (पाद्मे)

घृतारोपणकाले मन्त्र भेदाः

पादे सुमंगलंचेति कण्ठे भद्रमिति द्विज।

सुशोभनंतु शिरसि क्रमान्मन्त्रःप्रकीर्तिताः।

यद्वासर्वस्य मन्त्रस्य द्वादशाक्षरमेववा। (पारमे)

कलश स्नपने मन्त्र निरुक्तिः

विष्णोर्णुकं दधिक्रेति आप्याय मधुवेतिच।

त्रातारं भूर्भुवस्वेति गन्धद्वारां तथैवच।

शतधारं घृतंचैव एवं स्नपन माचरेत्।

हिरण्यवर्णां हरिणीति हरिद्रालेपनं चरेत्।

हिरण्यवर्णाश्शुचयेति हरिद्र स्नपनं चरेत्।

गन्धश्च स्नपनं कुर्यात् गन्धद्वारेति मन्त्रतः।

सहस्त्र धारया स्नानं पुरुषसूक्तंच तद्भवेत्। (विहगेन्द्रं)

अभिषेचन काले मन्त्र निरुक्तिः

यद्व्यस्य च योमन्त्रस्तन्मन्त्रेणाभिषेचयेत्।

अथवा पौरुषैः सूक्तैःद्वादशाक्षर विद्यया।

अथवा विष्णु गायत्रिया षडर्णेनाथवा रमे।

स्वमूर्ति विद्ययावाऽपि स्नापयेत् श्रीपतिं गुरुः। (श्री)

तन्तुवेष्टन काले मन्त्रः

त्रैगुण्यं सूत्रमावृत्य कलशी वार्धकी घटे।

''इन्द्रंनत्वेति मन्त्रेण तन्तुना परिवेष्टयेत्। (विहगेन्द्रं)

कलश भेदेन तन्तुवेष्टन भेदाः

तन्तुभिःक्रम योगेन वेष्टयेन्मूल विद्यया।

महाकुम्भम् त्रिसूत्रेण वर्धनींच द्विसूत्रकम्।

कलशांस्त्वेक सूत्रेण अन्तरं यवमात्रकम्। (मार्कण्डेयं)

सूत्रादीनां अधिदेवता विषये

कलशानांतु गरुडः शेषः सूत्रस्य दैवतम्।

कूर्चानांतु परंब्रह्मा चक्रिकाणांतु चक्रराट्।

वाससां वासुदेवोस्तु सर्वेषां स एववा। (ईश्वरं)

कलशाणामभावे

कलशानामभावे तु शङ्खं वा शुक्तिकंतु वा।

ईशाने निक्षिपेत्पात्रं स्नानार्थं कल्पितोदके।

पृथक् पृथक्च द्रव्याणि क्षिप्त्वाऽभिषेचयेत्। (तत्वसंहिता)

कलशेनिक्षेपणीय द्रव्यस्य शारीरक साम्यत्वम्

अस्तिरत्नं सिरा तन्तुं मांसं मृत्स्नेति कीर्तिताः।

मज्जाणितान्मेधो जलंरक्तं प्रशस्यते।

कूर्चंतु शक्ति इत्युक्तं चर्मस्यांबरवेष्टनम्।

सप्तदातूनि देहानां कुम्भेषु कलशेषुच। (पाद्मं)

महाभिषेक कर्तव्य कालानि

महाऽभिषेकमित्युक्तं महापातक नाशनम्।

विषुवे जन्म नक्षत्रे द्वादश्याममावासरे।

अर्धोदयादि कालेच जगत्पीडा समाकुले।

आकर्षण प्रतिष्ठाऽन्ते अन्येषु विविधोत्सवे।

आदौवन्तेच कर्तव्यं तत्तत्कालानुसारतः। (विष्वक्सेनं)

महाभिषेकस्य द्रव्याणां मानानि

तैलं त्रिभार मित्युक्तं तद्भारं माक्षिकं तथा।

द्विभारं घृतमित्युक्तं द्विगुणं क्षीरमुच्यते।

पञ्च भारं दधि प्रोक्तम द्विभारं इक्षुसारकम्।

तदर्धं आम्र संप्रोक्तं लिकुचाम्बु चतुर्गुणम्।

भारं नारङ्ग सारंस्यात् घनसारं दशांशकम्।

तण्डुलाम्बु द्विगुणं प्रोक्तं त्रिगुणं शुद्धतोयकम्।

रम्भा फलंतु लक्षं स्यात् तदर्धं नाळिकेरकम्।

सहस्त्र संख्या पनसं पञ्चचूर्णंतु भारकम्।

हरिद्राचूर्णं तु भारंस्यात् हरिभक्ति प्रदं शुभम्।

सिता भार त्रयञ्चैव तिन्त्रिणी अर्धभारकम्।

पिष्टं धात्रीच भारंस्यात् पुण्य तीर्थंच शोधितम्।

उत्तमोत्तम मित्युक्तं तदर्धं मध्यमोत्तमम्।

तदर्धं अधमंप्रोक्तं देशकालानुसारतः। (परम)

अभिषेक यजमानस्य फलं

एवं यः कुरुते भक्त्या श्रद्धा भक्तिसमन्वितः।

महींलोके सुखं प्राप्य पुत्र पौत्रादि संयुतः।

देहान्ते विष्णु सायुज्यं प्राप्नुयान्मम शासनात्। (विष्वक्सेनं)

द्रव्याणां अभिषेक क्रमाणि

प्रथमं गन्धतैलञ्च द्वितीयं आमलकं भवेत्।

तृतीयं पञ्चगव्यंस्यात् घृतस्नानं चतुर्थकम्।

पञ्चमं पयसस्नानं दधिस्नानंतु षष्टकम्।

सप्तमं पञ्चाऽमृतंचैव इक्षुसाराऽष्टकंतु वै।

नवमं मधुसम्युक्तं पनसं दशमं तथा।

एकादशाऽऽम्रसारंस्यात् पञ्चचूर्णं तुद्वादशम्।

त्रयोदशे हरिद्रांच बीजसारैःचतुर्दशी।

पञ्चदश्यां हरेःस्नानं मातुलङ्गरसेन च।

नाळिकेरांबुनीचैव जम्भीररसषोडशी।

सप्तदशं हरेः स्नानं तिंत्रिणीफल वारिणा।

अष्टादशंभवेत्स्नानं सर्वगन्धाम्बुभिर्हरिं।

एकोन विंशतिजले विंशतिकलशैस्तथा।

इत्येतेरुपचारैश्च स्नापयित्वा जनार्दनम्। (सनक संहिता)

स्नानकाले देव दर्शनेफलं

स्नानासनस्थं देवेशं यो नरो दर्शयिष्यति।

गङ्गास्नान फलंप्राप्यविष्णु सायुज्यमाप्नुयात्। (अनिरुद्धे)

स्नपन काल भेदेन फल भेदाः (पाद्मे)

पञ्चम्यां स्नपने विष्णोःयथेष्ट फलमश्नुते।

आजन्म ऋक्षे दशगुणं श्रवणे द्विगुणं भवेत्।

त्रिगुणं शशिनं पूर्त्या क्षयेशतगुणं भवेत्।

चतुर्गुणं स्यात् द्वादश्यां त्रिगुणं तारक त्रये।

संक्रांत्यां षड्गुणंस्यात् विषुवे त्रिगुणं भवेत्।

अयने दक्षिणं पर्वएकं शतगुणं भवेत्।

अयनेऽन्यत्रविहिते सहस्रगुणमप्लवम्।

विधौविधन्तुदग्रस्ते स्नानं त्रिंशद्गुणं भवेत्।

सूर्ये शतसहस्रं तु युगान्ते कोटि संमितम्।

अनन्तंस्यात् व्यतीपाते कालेष्वेतेषु पूजनम्। (अनन्तसम्हिता)

पञ्चगव्यस्य पृथक्फलानि

पञ्चगव्यानि गृह्णीयात् मृत्पात्रे नूतनेशुभे।

गोमूत्रं रोगनाशंस्यात् दधिः पुत्रविवर्धनम्।

घृतंतु देहशुद्धिस्यात् क्षीरेण आयुर्वर्धनम्।

गोमयेन पाप नाशंस्यात् पञ्चगव्यफलं शुभम्। (परम संहिता)

पञ्चगव्य पूजन काले स्थानानि

नवकृत मध्ये दुग्धं ऐन्द्रे तु दधिनिक्षिपेत्।

याम्यांतु घृतकुम्भंच गोमयं वारुणेतथा।

गोमूत्रं सौम्यदिग्भागे स्थापयेत् पञ्चगव्यकम्। (विष्वक्सेनं)

आडकादीनां प्रमाणानि

आढकद्वयसंयुक्तं तदेव शिवमुच्यते।

तद्वयं द्रोणमित्युक्तं तद्वयं खारि संज्ञकं।

तत्रयं भारमित्युक्तं तस्मात्सर्वान् विचिन्तयेत्। (पारमे)

अभिषेक घटानां दानस्य फलं

वासुदेवाऽभिषेकार्थं मृत्घटानि प्रयच्छति।

लोकेशतायुषम्स्यात् सर्वकामसमृद्धिमान्।

ताम्र कुम्भ प्रदानेन देवेन्द्रत्वम् समाप्नुयात्।

रौप्यकुम्भप्रदानेन ब्रह्मलोकं समश्नुते।

हेमकुम्भप्रदानेन विष्णुसारूप्यमाप्नुयात्। (अनिरुद्धे)

शाश्वत कवच समर्पण विधिः

कस्तूरिकां मृगमदं कर्पूरेण समन्वितम्।

चन्दनं कुङ्कुमंचैव वासनाद्रव्य सम्युतम्।

कवचे निक्षिपेत् गन्धं पुण्याहं वाचयेद्गुरुः।

तत्प्रतिष्ठाञ्च कुर्वीत गुप्तस्थाने समर्पयेत्।

बन्धयित्वातु कवचं सर्वाङ्गं परिवेष्टयेत्।

पूजयित्वा यथान्यायं क्षमापणमथाचरेत्।

एवंप्रकारं द्वादश्यां कारयेद्देशिकोत्तमः। (जयोत्तरे)

अभिषेचन द्रव्यभेदेन फलभेदानि

अभ्यङ्ग तिलतैलेन रमानाथं महत्प्रभुम्।

यः करोति सकृत् भक्ताः सकुबेर गृहेवसेत्।

रमानाथं महाविष्णुं दध्ना यः स्नापयेन्नरः।

सर्व पाप विनिर्मुक्ताः विष्णुलोके महीयते।

रमानाथं महाविष्णुं घृतेन स्नापयेन्नरः।

कल्पार्जितं महापापं तत्क्षणादेव नश्यति।

रमानाथं महाविष्णुं गोक्षीरेणच स्नापयेत्।

कुलैकविंशमुत्थाप्य पुण्यलोके महीयते।

रमानाथं महाविष्णुं मधुनास्नापयेन्नरः।

पापनाशंविनिर्दूय ब्रह्मलोके महीयते।

रमानाथं महाविष्णुं स्नानं इक्षुरसेन यः।

सकृदप्याचरेत् भक्त्या चन्द्रलोके समश्नुते।

लिकुचेन रसोत्पन्नं सारेण स्नापयेन्नरः।

रमानाथं महाविष्णुं पितृलोके महीयते।

नाळिकेर जलंस्नानं रमानाथस्य यद्भवेत्।

ब्रह्महत्यादि पापानां नाशनं परिकीर्तितम्।

रमानाथं महाविष्णुं रम्बाफलैश्चसिञ्चयेत्।

विन्यस्य सकलं पापं वायुलोके महीयते।

वस्त्रपूतेन तोयेन रमानाथं महत्प्रभुम्।

स्नापयेद्वारुणं लोकं आप्नोति द्विज सत्तम।

रमानाथं महाविष्णुं स्नापिते गन्ध वारिभिः।

सवै पुरुषोविप्र गन्धर्वलोकमाप्नुयात्।

रमानाथं महाविष्णुं फनसै रभिषेचयेत्।

फलभूमि मवाप्नोति सस्यवान्नात्र संशयः।

इक्षुसारञ्च जम्भीरं आम्रैःनाळिकेरकैः।

पञ्चामृतैश्च कर्पूरैः कुङ्कुमैरभिषेचयेत्।

रमानाथं महाविष्णुं फलैरन्यैश्च सिञ्चयेत्।

बहुपुत्रानवाप्नोति अतुलां श्रियमाप्नुयात्। (अनिरुद्धे)

स्नपनबिम्बमभावे विधिः

अभावेस्नपनार्चादेः हेतुना सन्निधावपि।

कूर्चेवा पादुकायांवा देवमावाह्य मूलतः।

तत्तद्बिंबोक्त कर्माणि कृत्वा मूले विसर्जयेत्। (नळकूभरे)

अन्यत्र

प्रातःकाले सपर्यायांस्नपनं कर्मकौतुके।

माध्याह्नेपिच सायाह्ने स्नपनं प्रोक्षणं भवेत्। (सनत्कुमारे)

स्नपने पञ्चद्रव्याणां लक्षणम्

एला लवङ्ग मधुरं कोष्टं चंपक कुङ्कलम्।

स्नपनाङ्गमिदं द्रव्यं पञ्चद्रव्यमिहोच्यते।

अभिषेक पञ्चामृतस्य लक्षणं

एकञ्च नाळिकेरञ्च कदळी सप्तमं भवेत्।

नाळिकेराऽर्धंचगुळंदध्यात्गुळाऽर्धं च घृतं मधु।

एलाचूर्णसंमिश्रं पञ्चामृतमिति स्मृतम्। (अनिरुद्धे)

पञ्चामृतस्य वैशेषिक भेदानि लक्षणञ्च

1-कदळी नाळिकेरञ्च सितामधुघृतं तथा।

समावयेस्तु पञ्चानां पञ्चामृतमिति स्मृतम्।

अन्यत्र

2-गोघृतं नाळिकेरञ्च पैशाच कदळीफलं।

शर्करा मधुसम्युक्तं पञ्चामृतमिति स्मृतम्।

अन्यत्र

3-फलसारं इक्षुसारं पुष्पसारं तथैवच।

नाळिकेरं घृतंचैव पञ्चामृतमिति स्मृतम्।

अन्यत्र

4-क्षीरं दधिघृतं चैव मधुशर्करमेव च।

उत्तमं द्रोणमात्रं तु मध्यमं तु तदर्धकम्।

तदर्धमधमं प्रोक्तंपञ्चामृतमिति स्मृतम्।

अन्यत्र

5-आम्रं फनसमेवोक्तं दाडिमं बीजपूरकम्।

नारङ्गं शर्कराचैव फलपञ्चामृतं स्मृतम्।

स्नपनस्यफलभेदेन कालभेदाः

मोक्षकाः सदाकुर्यात् स्नपनम् निशिवाहिनी।

रिपुक्षयार्थी दिवसे धर्मार्थी दिनमध्यमे।

दिनांते सर्वभोगार्थी प्रायश्चित्तेषु सर्वदा। (ईश्वरं)

स्नपनस्य एकभेर बहुभेरयोः स्थान भेदाश्च

एकभेरे गर्भगेहपुरतःस्नपनार्थिकाः।

बहुभेरविधाने तु प्रासादस्याऽग्रतोपिवा।

सर्वावरणभूष्वेव दिक्षुसर्वासुवा रमे। (श्री)

कलशेषु बध्नीय सूत्रानां नियोजन विधिः

घटेन येन देवेशःस्नाप्यते गुरुणा रमे।

तद्घटावेष्टितं सूत्रं छित्वा प्रादेश सम्मितम्।

बध्वाहरेः करेदेवि स्नापयेत्तद्घटांबुना। (श्री)

चतुस्थानार्चनभेदेन स्नपन भेदाः

चतुस्थानार्चनं कृत्वा स्नापयेच्च ततो हरिम्।

एषमुख्योऽभिषेकस्ते कथितः कमलेक्षणे।

विना होमं मध्यमं स्यात् तथा चक्राब्ज मण्डले।

पूजाहीनोऽधमो भद्रे कुर्याज्ज्ञात्वा विचक्षणः। (श्री)

हरिद्राचूर्णस्नपन फलं

श्रियः कुम्भात् समुद्दत्य श्रीसूक्तेनाऽभिषेचयेत्।

पूर्णाहुति यथाहोमे चूर्णस्नानं तथा भवेत्।

पवित्रारोपणेवापि पूर्णमाराधनं भवेत्। (पाद्मं)

तच्चूर्णेन तिलक धारणेफलं

हरिद्राकुङ्कुमं वापि चूर्णं विष्ण्वभिषेचितम्।

ऊध्र्वपुण्ड्रस्य मध्येतु धारयेद्दीपवत् द्विज।

विष्णुगात्रात् यच्चूर्णं ललाटे यदिधारयेत्।

अपोह्य पातकान्याशु मोदन्ते दिविदेववत्। (सनकं)

अभिषिक्तेतु यच्चूर्णं विष्णु बिम्बेतु यो नरः।

हरिद्रां धारयेन्नित्यं सोऽश्वमेध फलं लभेत्। (पाद्मं-पारमे)

ऊर्ध्वपुण्ड्रस्य आकार भेदेन फलभेदाः

येनोर्ध्वपुण्ड्रं सौम्यंस्यात् आर्जवञ्च कृतं भवेत्।

ते कराकार्य प्रकारेण तादृशं फलदं भवेत्।

ऊर्ध्व पुण्ड्रस्य अवश्यकत्वं

श्रीचूर्ण रहितं पुण्ड्रं कदाचिन्नैव कारयेत्।

धारयेद्यदि मोहेन तत्पुण्ड्रंस्यादनर्थकम्।

श्रीचूर्ण सहितं पुण्ड्रं विष्णुस्थानं प्रकीर्तितम्।

नोचेत् ज्येष्टागृहं विध्यात् तस्मात्तत् धारयेत् द्विज।

स पवित्रेण करेणैव धारयेदूर्ध्वपुण्ड्रकम्।

चंदनाऽऽलेपनंचैव तद्दानंचैव वर्जयेत्।

कण्ठे तुळसीमाला धारणे फलं

कण्ठमूले तु तुळसीं यस्तु धारयते नरः।

अहोरात्रकृतं पापं तस्य नश्यति तत्क्षणात्। (अगस्त्ये)

प्रतिष्ठाकाले कर्तव्य स्नपन नियमाः

नयनोन्मीलनात्पूर्वं नवभिः पञ्चभिस्तु वा।

कलशैःस्नापयेत्पूर्वं नयनोन्मीलनं ततः।

तत्वन्यासहोमादीन् कृत्वा देशिकसत्तमः।

पुनः पूर्वोक्त कलशैः संस्नाप्य पुरुषोत्तमम्।

देवीभ्यां देवदेवेशं शय्यायां शाययेत्ततः।

प्रातरुत्थाय देवाय भोगान् संदर्शयेत् क्रमात्।

कलशैः सप्तदशभि र्षोडशैर्द्वादशैस्तु वा।

अभिषिच्याथ देवाय मुद्वान्नं विनिवेदयेत्।

प्रतिष्ठादिवसे प्रातस्त्रिंशद्भिः पंचविंशकैः।

एकविंशैस्तु वा जिष्णुं कलशैरभिषेचयेत्।

तदन्येद्युःप्रभातायां अष्टोत्तर शतैर्घटैः।

एकाशीति घटैर्वाऽपि संख्यैकेन विहीनया।

पञ्चाशतावा देवीभ्यां देवं संस्नापयेद्रमे। (श्री)

स्नपन मध्ये उपचारनियमाः

प्रतिद्रव्यं तु मन्त्रेण ह्यघ्यालभन माल्यकैः।

धूपद्रव्यैः समभ्यच्र्य ततस्तेनाऽभिषेचयेत्। (श्री-ईश्वरे)

स्नपने पर अपर भेदेन द्विविध लक्षणे (ई)

स्नपनं द्विविधंविद्धि पराऽपरविभेदतः।

परंतु दशधाप्रोक्तं प्रधानादि विभेदतः।

प्रधानं प्रथमं विद्धि द्वितीयंतु परं स्मृतम्।

तृतीयं पर सूक्ष्मंस्यात् परस्थूलं चतुर्थकम्।

पञ्चमं स्यात् सूक्ष्मपरं सूक्ष्मसूक्ष्मंतु षष्टकम्

सूक्ष्मस्थूलंसप्तमं स्यात् स्थूलं स्यात् परमष्ठमम्।

स्थूलसूक्ष्मं तु नवमं स्थूलस्थूलं तदुत्तरम्। (पारमे)

चतुर्धात्वपरं विद्धि ह्येकैक नवधास्थितम्।

उत्तमोत्तम पूर्वेण भेदेन द्विजसत्तम।

पराऽपरविभेदानामेषां साधारणं स्थितम्।

अनन्तकलशंनाम्ना स्नपनं सर्वपूरकम्। (पारमे)

<u>पूर्वोक्तद्रव्याऽलाभे प्रतिद्रव्यानां नामानि</u>

पाद्ये द्रव्यान्तरालाभे दूर्वाऽर्घ्ये च सर्षपः।

शस्तमाचमनीये तु तक्कोलं मार्जनाम्भसि।

सहदेवी गन्धतोये चन्दनक्षोद इष्यते।

कषायतोये च अश्वत्थम् शीतं उष्णोदके असति।

रत्नोदके वज्रमेकं कदळ्येका फलाम्भसि।

सुवर्णं लोहपानीये शालि तण्डुलमक्षते।

यवोदकघटे व्रीहिः शस्यते कमलासन।

अलाभे दधिनी क्षीरं क्षीराभावे तु तद्दधि।

मधून्यलाभे सर्पौषि तदलाभे भवेन्मधु।

अलाभे पञ्चगव्यानां घृतमेवैक मिष्यते।

पञ्चगव्येतु यस्यस्यात् अलाभः तत्पदे घृतम्। (पाद्मं)

स्नपन कालभेदेन तीर्थस्य परिमाण विधिः

प्रातःकाले सपर्यायां स्नपनं कर्मकौतुके।

तथैव स्नपनं वज्र्यं अन्यकालेच प्रोक्षणम्।

पूर्वाङ्हे qवशतिद्रोणं मध्याङ्हे द्विगुणं भवेत्।

सायाङ्हेविंशति द्रोणं अष्टद्रोणाऽर्ध रात्रिके।

इत्येते जलसंख्यास्यात् अभिषेकं विधीयते। (सनत्कुमारे)

वस्त्रादीनां अभावेन अभिषेचिते प्रत्यवायः

यज्ञोपवीतपुष्पाद्यैः समभ्यर्च्य यथा विधिः।

पुरुष सूक्तेन मन्त्रेण स्नानं कुर्यात् जनार्दनः।

वस्त्रपुष्पाणि हीनेन स्नानं कुर्यात् जनार्दनः।

तत्स्नानं राक्षसं ज्ञेयं तद्ग्रामं राक्षसं भवेत्। (सार समुच्चये)

अभिषेक काले कलशानामभावे पर्याय विधिः

जलजानां च बिम्बानां नित्यस्नानं विधीयते।

लोहजानां च बिम्बानां स्नानं पर्वणि पर्वणि।

कलशानामभावे च स्नानार्थं कल्पितोदके।

पृथक् च द्रव्याणि क्षिप्त्वा क्षिप्त्वाऽभिषेचयेत्। (तत्वसम्हिता)

पूजितकलशस्य पर्यूषितदोषाऽभावः

अधिवासित कुम्भस्य तीर्थानां पूर्वमेवतु।

न पर्यूषित दोषोस्ति अधिवासैःतथाऽर्चनैः। (श्रीः)

औपचारिक(अलंकारासन) उपचाराणि

दर्पणं व्यजनं छत्रं पूकशं (कलशं)पूर्ण पात्रकम्।

धूपं दीपं महाकुम्भं नृत्यं वाद्यं च गीतकम्।

योषितेश्चतुरङ्गैश्च मात्रा मुद्रा विराजितैः।

सर्पाकृति दर्शितानि औपचारिकमिष्यते। (जयाख्ये)

वस्त्र समर्पणे कालभेदेन वर्णभेदाः

उषत्कालेतु नीलंस्यात् पूर्वाह्ने शुद्धवस्त्रकम्।

मध्याह्नेरक्त वस्त्रंस्यात् सायाह्ने क्षौम वस्त्रकम्।

निशायां श्यामवर्णंस्यात् रात्रौपीतांबरं धरेत्। (अनिरुद्धे)

यज्ञोपवीत धार्यमान विधिः(आचार्यस्यच

नाभेरूर्ध्वमनायुष्यं अधोनाभेस्तपः क्षयम्।

तस्मात् नाभिसमं कुर्यात् यज्ञ सूत्रं च धारयेत्।

तालमान गते सूत्रे एकाशीति गुणीकृतम्।

त्रिगुणं त्रिगुणीकृत्य परिवृत्य पुनः पुनः।

स्वर्णोपवीतकं नित्यं यथाकाले च धारयेत्। (धर्म शास्त्रे)

अङ्गनस्य लक्षणमाह

उक्तचन्दन कस्तूरि करटी रोचना जटा।

अङ्गनानामभावे च चन्दनं च प्रशस्यते।

हैम कर्पूर संयुक्तं अशीत गुण रञ्जनम्।

अञ्जनं हस्त संग्राह्यं उक्त मार्गेण मर्धयेत्.

दर्पणाकारवदने घोनाग्रे मत्स्य रूपिणम्।

अञ्जनं च शलाकं च देव नेत्रे च रञ्जयेत्।

सूर्याय चन्द्र देवाय नयने मध्य देवताः।

तत्प्रमाणंच नयनं सर्व काम फलप्रदम्। (बृहद्ब्रह्मे)

गंधसमर्पण क्रमः

तद्विप्रासेति मंत्रेण गंधेन ऊध्र्वाग्रमालिपेत्।

ललाटे भुजयोःकण्ठे नाभौ वक्षसिच क्रमात्। (शाण्डिल्ये)

प्रातःकाल पूजने उपयोज्यपुष्पाणि

पाटलं शतपत्रञ्च तुळसी घटमल्लिका।

नन्द्यावर्तञ्च मंदार माधवी चंपकं तथा।

पुन्नाग केतकीचैव प्रातःकालार्चने दश।

मध्याह्नकाल पूजने उपयोज्यपुष्पाणि

श्वेताब्जं करवीरञ्च पालाशं तुळसी तथा।

उत्पलं बिल्व दूर्वाच रक्तोत्पलमथापिवा।

कोविदारक पत्रञ्च श्वेतपाटलमेवच।

प्रोक्तान्येतानि पुष्पाणि दश मध्याह्न पूजने।

सायाह्नकाल पूजने उपयोज्यपुष्पाणि

रक्ताब्जं कुमुदञ्चैव मल्लिका जाति मालति।

माधवी करवीरञ्च ह्रीभेरपुष्पदंशकम्।

तथादमनकञ्चैव सायङ्कालाऽर्चने हरेः। (पाद्मे-श्रीधरीये)

सर्वकालार्चनीय उपयोज्य पुष्पाणि*

ह्रीबेरंच तमालंच तथा दमनक त्रयम्।

तुलस्यौ सित कृष्णेच केवला क्षपकस्तथा।

एतैःसंपूजयेत् सर्वकालेषुच तथाऽर्चयेत्। (श्री)

अभीष्टफलावाप्ति कथनम्

कल्हार पङ्कज पलाश सुगन्धितानि-

बिल्वैश्च पाटलमशोक स चंपकानि।

अन्यानि सौरभ सुपुष्पविचित्रितानि-

अष्टाधिविंशतिशतं द्विशताधिकानि।

पक्वानि क्षीर मधुपर्क सुसर्पिषाणाम्-

वस्त्राणिसूक्ष्म वनमालविचित्रितानि।

प्रज्वाल्यमग्नि विधितानि तिलानि पुष्पैः-

मध्वादिरंभ पनसाम्र फलानिरम्ये।

भुक्तानिशांबु मृगनाभि सुचन्दनानि-

कर्पूररोचनाऽगरु सुगन्धितानि।

एवंसदैवविहितानि विपश्चितानि-

सर्वममाऽर्चयभवेदिह सर्वकामः।। (श्रीधरीयं)

धूप द्रव्यस्य लक्षणं

गुग्गुळ्यादगरुंचैव सकोष्ट चन्दनं तथा।

उशीरं च गुग्गुळंचैव धूपं कर्पूरकैर्युतम्।

एवमष्टविधं ग्राह्यं धूपद्रव्यमितिस्मृतम्। (सनत्कुमारे)

धूप पात्रस्य लक्षणं

धूप पात्र प्रमाणेन द्विपादं मुख वृत्तकम्।

पद्मं पावक पूरंच तन्मानं तालमेवच।

एवमेतत्प्रमाणेन धूप पात्रस्य लक्षणम्। (पारमे)

धूप पात्रस्य अधिदेवताः

मुखे पावक दैवत्यं द्विपादौ चन्द्रसूर्ययोः।

धूप पात्राधि दैवताय ओं नमःपावकाय च । (पाद्मे)

धूप समर्पण लक्षणमाह

न धूपैः स्फुरदङ्गारैः नज्वालैश्च निरञ्जनैः।

धूपं दत्वाऽथ देवेशं पादं वामेन ताडयेत्।

देवदारु कृतं धूपं चन्दनाऽगरु मिश्रितम्।

दद्याद्देवाय पूजायां सधूमाऽङ्गार सम्भवम्।

शाली सर्जर संदग्ध कृत्रिमाऽगरु मिश्रितम्।

धूपं सौगन्धमादाय देवाय विनिवेदयेत्। (परम संहिता)

धूप समर्पण कालानि

पुण्याहं पात्रपीठं च स्नानं गन्धादि धूपकम्।

कलशं शान्ति होमं च अभिषेके केशशोधनम्।

रक्षामुहूर्तं दीपान्तं धूपं दत्वा प्रदर्शयेत्। (सनत्कुमारे)

दीपारोपण लक्षणं

मुखे वक्षसि नासाग्रे कण्ठे वक्षसि पादयोः।

प्रत्येकं प्रणवाकारं दीपारोपण लक्षणम्। (परमे)

अन्यत्र

दक्षिणंपादमारभ्य वामपादंतु पश्चिमम्।

वाद्यमङ्गलसंयुक्तं गीतमङ्गुष्ट संयुतम्।

दीपं आरोपयेन्मन्त्रि उद्दीप्यस्वेति मन्त्रतः। (अनिरुद्धे)

दीपारोपण यजमानस्य फलं

वक्रे वक्षसि नाभौ च जानू पादद्वये तथा।

एवं पञ्च विधं कुर्यात् चक्राकारं च वेष्टयेत्।

तत्सन्निधौ महादीपानारोपयति यो नरः।

दीपं दीपद्वयं वापि आज्येन तैलेनवापुनः।

इहे सांराज्यतां प्राप्य देहान्तेयांतितत्पदम्।

कार्पासं पाटलं वापि पद्मतन्तु समुद्भवम्।

कौसंबं रजितं कृत्वा देवस्याग्रे समर्पयेत्।

तच्च संख्यैक वर्षाणि वैकुण्ठे वसति ध्रुवम्। (विहगेन्द्रे)

एकदीपादीनां अधिदेवता निर्णयं

पञ्चदीपं निवृत्यादि एक दीपे सरस्वति।

अष्टदीपे अष्टशक्तिस्यात् द्वादशे केशवार्चनम्।

वासुदेवाद्यनिरुद्धान्तं षोडशं दीप देवताः।

सप्तविंशतिनक्षत्रं कोकणं च विनिर्दिशेत्। (विष्णुसंहिता)

दीप पात्रस्य लक्षणं

दीपपात्रं तथानाळं मध्ये कुमुदकुड्मलम्।

वह्न्यआधारं शतेनापि युक्तमष्टाभिरेवच।

विंशत्याचाऽष्टभिश्चैव द्वाभ्यां पद्यांच सम्युतम्।।

अष्टभिर्वा नवभिर्वापि एक हस्तोच्छ्रितं भवेत्।

एकदीपाऽग्रतो न्यस्य कल्पयेच्चिल्प वित्तमः।

दीप पात्रं सरोजाभं सुवर्णादभि निर्मितम्।

अथवा विकसेत्पद्मं सदृशं द्वारशोभितम्।

इन्दुनाळं तथानाळं दण्डाग्रे सुप्रतिष्ठितः।

उद्दीप्यस्वेति मन्त्रेण दीपमारोपयेत्सुधीः।

दीपजालेषु ताराणि मध्यदीपेषु वै विधुम्। (श्री)

दीपे निवेशित आज्यादीनं विशेषः

उत्तमं गोघृतंचैव मध्यमं तिलतैलकम्।

अधमं वृक्षतैलंच दीपतैलमिहोच्यते।

दीपस्य कापिलं सर्पिः उत्तमं परिचक्षते।

मध्यमं श्वेतवर्णानां गवां पद्मसमुद्भव।

कृष्णगोभ्यां समुद्भूतं अधमंचाज्यसम्मितम्।

अथवा तिलतैलेन अन्य तैलं न कारयेत्। (चित्र शिखण्डि)

दीपादनन्तरं धूप समर्पणे फलं

दीपञ्च प्रथमं दध्यात् पश्चात् धूपं समर्पयेत्।

वामनासापुटे धूपं दीपं अक्षिणि दक्षिणे।

नित्य दीपं क्रिया दीपं बलि दीपं तथैव च।

प्रमादाद्दीप शून्येन तत्र दीपं शतं भवेत्।

मोक्षार्थी दीप माद्यञ्च वर्धन्ते ब्राह्मणानृपाः।

स्वर्गे फलंचेत् धूपादीन् वर्धन्ते वैष्णवास्सदा।

तस्मात्सर्व प्रयत्नेन दीपाद्धूपं समर्चयेत्। (पारमे)

घटदीप समर्पण कालः प्रयोजनं च

यात्राकाले विशेषेण कुर्यात् नीराजनं हरेः।

दृष्टि दोषाऽभवेद्बिम्बे संकरस्पर्श सम्भवः।

स्पर्शाऽस्पर्शादिकं बिम्भे मन्दिरे संभवेद्यदि।

एवमादिषु शान्त्यर्थं घटदीपं प्रदर्शयेत्।

फलं वा मुद्गखण्डं वा चणकं वा निवेदयेत्। (सात्वते)

घट दीपस्य वर्तीनां लक्षणमाह

उत्तमाज्यस्य दीपञ्च मानं सप्ताङ्गुलं भवेत्।

मध्यमं त्र्यङ्गुलं प्रोक्तं अधमं द्वयङ्गुलं भवेत्।

प्रमाणरहिते दोषनियमाः

मानहीने महाव्याधि अधिके शत्रु वर्धनम्।

तस्मात् मानसमं कुर्यात् राजराष्ट्राभिवर्धनम्।

एतत् प्रमाण दीपस्य अधिदेवता निर्णयं

यज्ञमूर्तिंच तच्चक्तिं चतुःश्रृङ्ग समन्वितम्।

पादत्रयं समायुक्तं शिरोद्वय समन्वितम्।

सप्तहस्तं महाविष्णुं षण्णेत्रं धवळ द्युतिम्।

शङ्खचक्र गदापद्म चापादिषु धरं हरिम्।

स्वाहा देव्यादि सहितं बहु दीपेन धारयेत्।

अर्चयेत् अग्निमन्त्रेण दीपं धूपऽवसानकम्। (शाण्डिल्ये)

पिष्टदीपस्य लक्षणम्

गोधूम तण्डुलं पिष्टंशर्करेण समन्वितम्।

एलाचूर्णसमायुक्तं घृतेनच समन्वितम्।

दीप पात्राकृqत कृत्वा मध्ये दीप समन्वितम्।

पिष्ठ दीपमिति प्रोक्तं देवदेवाय दापयेत्। (अनिरुद्धे)

नरकचतुर्दशि दिवसे दीपारोपणे फलं (विष्णु तिलके)

आश्वयुज कृष्णपक्षस्य चतुर्दश्यां जनार्दनं।

ब्राह्मे मुहूर्तेचोत्थाय स्मरेत्सर्वात्मकं परम्।

तैलाभ्यङ्गं प्रकुर्वीत बन्धुभिःसह धर्मज।

अरुणोदय वेळायां कुर्यात्तात्कालकीं क्रियाम्।

गायत्र्यादि जपं कृत्वा सर्वंवै स्नानपूर्वकम्।

स्नान धूपादिनैवेद्यं पूजयेत् प्रयतो हरिम्।

भक्ष्यभोज्यादि नैवेद्यं यः प्रीणयति केशवम्।

तिलतैल प्रदीपैश्च सोऽश्वमेध फलं लभेत्। (महाभारतेच)

दीपदानेन फलमाह

दीपदानं प्रवक्ष्यामि फलयोग मनुत्तमम्।

यथायेन यथाचैव प्रदेया यादृशाश्च ते।

ज्योतिस्तेजः प्रकाशं वाप्यूर्ध्वदश्चापि वृण्यते।

प्रदानं तेजसातस्मात् तेजोवद्धृयते नृणाम्।

अजस्तमस्त मिश्रंच दक्षिणायनमेवच।

उत्तरायणमेतस्मात् ज्योतिर्दानं प्रशस्यते।

यस्मादूर्ध्वगमेतच्च तमसश्चैव भेषजम्।

तस्मादूर्ध्वगते दाता भवेदत्रेति निश्चयः।

दीपदात भवेन्नित्यं यइच्छेत् भूतिमात्मनः।

कुलोध्यता विशुद्धात्मा प्रकाशत्वच्च गच्छति। (ज्योतिषे)

कार्तिकादि मासे दीप दाने फलं

कार्तिक्यां दीपदानंच यःकरोति गृहे गृहे।

समुक्त सर्व पापेभ्यो विष्णुलोकं समाप्नुयात्।

कार्तिक्यां नृप शर्वर्यां दीपं दद्याद्यतो हरेः।

एकं वा पञ्च चत्वारि तस्य पापं सकृन्दति।

यः कुर्यात् दीपदानंच एकमेकं दिने दिने।

आमासंच स्वकैर्वंशैः विष्णुलोकं भवेद्ध्रुवम्।

पूर्णमासेतु विख्याते हरेः प्रियतरोभवेत्।

*प्रदोत्सर्गं(र्जम्)अन्नदानं करोति यः।

सर्वान् वंशान् समुद्धृत्य सविष्णु पदमश्नुते। (नारदीये)

नित्य पूजेषु दीप समर्पण कालाः

शयनांतेचाऽर्चनांते होमान्ते बलिदानके।

स्नानान्ते भोजनान्तेच भ्रमणान्ते विशेषतः।

तत्तत्संपूरणार्थाय नीराजन मथाचरेत्।

नीराजनं विनाकुर्याच्चतत्कर्म निष्फलं भवेत्। (सनके)

नीराजनस्य त्रै विध्यं

स्नानांते भोग यज्ञान्ते द्वितयं सात्विकं भवेत्।

सायंकाले प्रतिदिनं कुर्याद्राजस संमितम्।

पूजायां दीप दानाग्रे नैवेद्यान्तेपि तामसम्।

अलंकारासनोक्तानां भोगानां अन्ततोपिवा।

उभयत्रापिवा कुर्यात् विभवेच्छानुसारतः।

कुर्याद् प्रासाद एकस्मिन् तेषामेकं नतु त्रयम्। (पारमे)

घट दीपस्य लक्षणमाह

पञ्चविंशाङ्गुलाऽऽयामं विस्तारं तत्समं भवेत्।

मुखं नवांगुलं प्रोक्तं पादंच चतुरंगुलम्।

नाळं सप्तांगुलोत्सेध्मष्टपत्रंच कर्णिकम्।

एवमेव प्रकारेण घट दीपस्य लक्षणम्। (हिरण्य गर्भे)

घटदीपस्य आवाहन देवताविधिः

पञ्च विंशाङ्गुलायामं षोडशाङ्गुल विश्रुतम्।

वृत्तपादं समायुक्तं अग्रे पद्म समन्वितम्।

घटाग्रे चन्द्र दैवत्यं कण्ठेस्याद्विष्णुदैवतम्।

उदरे बृह्म दैवत्यं आसने रुद्रदैवतम्।

मुखे पावकमावाह्य घट दीपं प्रदर्शयेत्।

आपादे चक्र दैवत्यं वृत्तश्चक्राधि दैवतम्।

एवमेव प्रकारेण पादादारभ्य दैवतम्। (पारमे)

घट दीपसमर्पणकाले दर्शन फलम्

घटदीपंतु यःपश्येत् देवस्य पुरतस्थितः।

सप्त जन्मार्जितं पापं तत्क्षणादेव नश्यति। (वि-तिलके)

घटदीपस्यज्वालायांउत्तमादि भेदाः

उत्तमं त्रयङ्गुलंज्वाला मध्यमंतु द्वयङ्गुलम्।

अधमैकाङ्गुला प्रोक्ता दीपज्वालेति लक्षणम्। (त्रैलोक्यमोहने)

नीराञ्जनस्य अन्यविधेषुलक्षणं

कार्पासबीजं सितरक्त पुष्पं दूर्वाक्षतं सर्षपनिम्बपत्रम्।

नीराजनांते प्रतिनित्यमेवं कार्या त्रिकालेपि हरिद्रतीर्थैः।

धूप दीप समर्पण क्रमः

घट दीपंच धूपंच पात्रकर्पूर दीपकम्।

सर्वान् देवान् समभ्यर्च्यचक्राकारं त्रिवेष्टयेत्। (पाद्मे)

मात्रादानस्य लक्षणं

मात्रादानं ततो दध्यात् तत्प्रकारमिहोच्यते।

सौवर्णादिषु पात्रेषु यद्वा वेत्रलता कृते।

तण्डुलंच ततो वस्त्रं विन्यसेच्चत्तिलानपि।

तिलेषुविलिखेत् पद्मं विश्व मन्त्रेण पद्मज।

कर्णिका केसरयुतं चतुर्दळ समन्वितम्।

हेमं फलंच मध्वाज्यं प्रतिपर्णान् पृथक् पृथक्।

सचूर्णं पूर्य ताम्बूली विन्यसेत् कर्णिका तले।

पात्रमुत्थाप्य हस्ताभ्यां उद्दीप्यस्वेति दर्शयेत्।

देशिकाय स्वयंदद्यात् गोविन्दप्रियतामिति। (वि-तिलके)

आभ्यवहारिक (भोज्यासन)उपचाराणि

सूपोदनं घृतान्नंच तिलान्नं कृसरं तथा।

गुडोदनं घृतान्नंच क्षीरोदन मथापिवा।

पायसान्नमपूपादि लाज सक्तु फलादिकम्।

फलं मूलादिकंचैव तांबूलंच तथैवच।

आहारादि च सर्वत्राऽऽभ्यवहारिक मुच्यते। (जयाख्ये)

प्रसादस्य पद निरुक्तिः

प्रकारं प्राणमित्युक्तं सकारं सर्व साधनम्।

दकारं देवता रूपं प्रसादं नाम उच्यते। (अनिरुद्धे)

उत्तमादि भेदेन प्रसादस्य मान भेदाः

उत्तमं त्रिशतं भारं मध्यमं द्विशतं भवेत्।

अधमं शत भारंच त्रिविधा संप्रकीर्तिताः।

तदर्धं वा तदर्धं वा यथा विभव विस्तरम्।

एवं प्रकारं नैवेद्यं दध्यात् रसवच्च्युतम्।

तदन्नं मेरुनातुल्यं अनंत फलदं भवेत्।

भक्ति पूर्वं प्रदध्यात् महाहविर्निवेदयेत्। (अनंत सम्हिता)

अपूपस्य लक्षणमाह

अपूप रहितं भोज्यं अभोज्यमितिहि स्मृतम्।

तण्डुल क्षारकं कृत्वा पिष्टीकृत्य द्विज स्त्रिया।

तण्डुलात्तदर्धं घृतेनैव योजयित्वाच पिष्टकम्।

त्वदिते लोघृतेसंयक् पलाशच्छतवद्भवेत्। (पारमे)

नारङ्गपत्र चूर्णस्य लक्षणम्

निंबपत्रैश्च संयुक्तं नारङ्गदळसंयुतम्।

जंबीरपत्रसंयुक्तं काळपत्रैः समन्वितम्।

आखण्ड समवायुक्तं हिंगुजीरक संयुतम्।

सैंदवेण समायुक्तं ऊर्वेणच समन्वितम्।

उलूखले विनिक्षिप्य मुसलेनैव मर्दयेत्।

निंबपिण्डमिति प्रोक्तं दध्यन्नं विनिवेदयेत्।

प्रातः काले निवेद्यात देव देवस्य शार्ङ्गिणः(विष्वक्सेने)

रोग भेदेन प्रसाद निवेदने भेदाः

नेत्ररोगं गुळान्नं स्यात् तिन्त्रिण्यान्नं महोदरम्।

जलरोगं नाळिकेरान्नं लिकुचान्नं च गुल्मयोः।

कुष्टरोगं तिलान्नं स्यात् मरीचि पित्त नाशिनी।

दध्यन्नं शीतवातं स्यात् पित्त काशं कपित्तयोः।

द्राक्षाफलं मेहरोगं कर्ण रोगादिजंबीरम्।

शीत ज्वरं गुळापूपं हरिद्रान्नं अजीर्णयोः।

जङ्घिवातंच मुद्गान्नं स्त्रीजातिश्च मखण्डयोः।

शिशुजन्निश्च मुद्गापूपं कदळी गर्भरोगयोः।

पनसं शंखरोगं स्यात् मन्त्र रोगादि पायसं।

आयुरारोग्यं ऐश्वर्यं क्षीरं ताम्बूल मेवच।(/मति शुद्धिश्च)

एतानि निवेदितान्नानि देयं भुक्ति यथा क्रमम्।

दद्याद्यदि ब्राह्मणं च सर्व पापैः प्रमुच्यते।(गरुडे)

<u>विसर्जनीय नैवेद्यानि</u>

माक्षिकं क्रिमिशान्नंच पाषाणं धान्य दूषकम्।

देहजं नासिका वासं अन्य जाति विलोखनम्।

कुम्भीपाकं द्रव्य हीनं पूर्व भागंच मिश्रकम्।

अत्युष्णमति मंदंच एवमादि विसर्जयेत्।

सावधानेन पक्कान्नं मन्दोष्णंच निवेदयेत्।(श्रीः)

<u>नैवेद्य समर्पण क्रमः-नियमंच</u>

अ र्घ्येदकेन संप्रोक्ष्य शोषणाद्यभि मन्त्रयेत्।

बलमन्त्रेण संजप्त्वा हस्त न्यासं दिशो दिशि।

ग्रासमुद्रेण संग्राह्यं चक्र सौरभि दर्शकम्।

मूलमन्त्रं पुरस्कृत्य मधुवाताऋषयं जपेत्।

उत्तमा पञ्चविंशत्या मध्यमं पक्षमेवच।

अधमं नवमं प्रोक्तं नैवेद्यं च समर्पयेत्।

मूलविग्रह देवस्य आदौ नैवेद्यकं चरेत्।

तथा उत्सव देवस्य नैवेद्यं च समर्पयेत्।

मूलभेरस्य देवीभ्यां श्री भूमिभ्यां निवेदयेत्।

तथा उत्सव देवीभ्यां श्री भूमिभ्यां निवेदयेत्।

स्नान मूर्तिंच नैवेद्यं बलिमूर्तिमतः परम्।

यागमूर्तिमतः पश्चात् भोगमूर्तिमतः परम्।

साळग्रामं च नैवेद्यं पादुकास्तदनंतरम्।

अनन्तं गरुडं चैव विष्वक्सेनं प्रपूजयेत्।

चण्डः प्रचण्डं द्वारस्थं भक्तबिम्बंच पूजयेत्।

अपूपादि फलादीनि दर्शयेन्मुद्रया विना। (विहगेन्द्रे)

अन्यत्र

अन्नादीन् क्रमशो न्यूनं दशभागं स्मरेद्रमे।

मूलादि सप्त बिम्बानां सप्त भागं निवेदयेत्।

सालिग्रावस्यैक भागं विमानस्य तथा परम्।

होमायचापरं भागं पात्रेऽन्यस्मिन्निवेशयेत्।

द्वात्रिंशत् कबळान् विष्णोः'देवस्यत्वेतिमन्त्रतः। (श्रीः)

<u>नैवेद्य समर्पण क्रमाः</u>-अन्यत्र विधिः

आचार्यं हस्तमादाय देवी हस्ते प्रदापयेत्।

देवी हस्तात्समुद्धृत्य देव भुक्तिं यथा विधि। (विष्णुतत्वे)

<u>विष्णोर्निवेदित प्रसादस्य प्रयोजनमाह्</u>

विष्णोर्निवेदितान्नेन श्राद्ध्य कर्माणि कारयेत्।

भुञ्जीत विष्णु नैवेद्यं देवीभ्योपि निवेदितम्।

चण्डादि परिवाराणां यदन्नंच निवेदितम्।

तन्न भुञ्जीतमनुजाः जलेऽग्नौवा विनिक्षिपेत्।

आलये देवदेवाय यद्यत्तस्मै निवेदितम्।

तेनैव स्व गृहेविष्णुं तोषयेदनिशं ततः। (खग प्रश्ने, वि-तिलके)

<u>निवेदनकाले असन्निधेयभोगानां मनसाध्यानप्रकारः</u>

सव्येण पाणिनाऽऽस्पृश्य प्रकोष्टंदक्षिणस्यतु।

तेनदक्षिण हस्तेन अग्र संकुचितेनतु।

निवेदयेत्ततोविप्र शिरसाऽवनतेन तत्।

असन्निधेश्च यो भोगो ह्यङ्ग भाव मनुव्रजेत्।

तत्तत् ध्यात्वा तु मनसाभक्त्याविष्णोर्निवेदयेत्। (ईश्वरे)

<u>भोज्यासन उपचाराणि</u>

अष्टपुष्पाञ्जलिंचैव रत्नदानं तथैव च।

घृतंच व्यंजनं चैव दधिक्षीर मधूनिच।

अर्हणं प्रापणं चैव पायसान्नं तथैवच।

फल मूलमपूपादि मोदकंच गुळं तथा।

हस्तप्रक्षाळणंचैव पाद्य ताम्बूलमेवच।

कूर्च प्रसारणंचैव अन्नदीपंच दर्शयेत्।

होमं भूतबलिं कर्मो भोज्यासनमिति स्मृतम्।

अर्हणपानीय लक्षणं समर्पणवैशेषिकं च

शीतलोदक संयुक्तं एलाकर्पूर संयुतम्।

मन्दोष्णं वासनायुक्तं अर्हणांबु इति स्मृतम्।

भोज्यासनादौ भोज्यान्ते दद्यादर्हणाम्बु च। (श्रीः- पाद्मे)

तर्पण जल लक्षणमाह

शीतळं तर्पण जलं नारिकेल जलान्वितम्।

श्रमशान्ति निमित्तानि अन्यान्यपिनिवेदयेत्। (पारमेश्वरे)

ग्रासमुद्रालक्षणमाह

नैवेद्यानिच सर्वाणि प्रत्येकं ग्रासमुद्रया।

पञ्चाङ्गुलीना मग्रंतु संयोज्य कमलासन।

अन्वारब्धेन वामेन पाणिना दक्षिणेनच।

नैवेद्य परमान्नादि मुद्रा सा ग्रासमुद्रिका। (पाद्मे)

अन्यत्र

पञ्चाङ्गुलीनामग्रंतु संयोज्य कमलासन।

सशीर्ष जानुनी भूमौ कृत्वा विष्णोर्निवेदयेत्।

नैवेद्यकानि सर्वाणि प्रत्येकं ग्रास मुद्रया। (हयशीर्षे)

देवस्य निवेदन पूर्व क्रम लक्षणे

अर्घ्योदकेन संप्रोक्ष्य शोषणाद्यभिमन्त्रयेत्।

बलमन्त्रेण संजप्त्वा हस्तन्यासं दिशोदिश।

ग्रासमुद्रेण संग्राह्य चक्र सौरभि दर्शनम्।

मूलमन्त्रं पुरस्कृत्य मधुवात त्रयं जपेत्। (वासिष्टे)

कालभेदेन नैवेद्य द्रव्य भेदाः

उषःकालेच दध्यन्नं चित्रान्नं संगवे तथा।

मध्याह्ने सस्यभोज्यंस्यात् सायाह्नेगुळमिश्रितम्।

रात्रौच पायसं दद्यात् निशि क्षीरान्नमाचरेत्। (अनन्ते)

आलयाश्रित बिम्बानां पूजनात् मूलभेर पूजने श्रेष्टतम विषये

आलयाश्रित बिम्बानां नैवेद्यान्तं प्रपूजयेत्।

मन्त्र न्यासं बलिं होमं बेराणांच न कारयेत्।

मूलेसिक्तस्तथा वृक्षः शाखा भवतु तेजसा।

मूलेन पूजनं कुर्यात् सर्वं भवतु पूजनम्। (विहगेन्द्रे)

ग्रास मुद्रा विषये

वामेन पाणिना स्पृश्य प्रकोष्टं दक्षिणेनतु।

तेन दक्षिण हस्तेन दध्यात् भोज्यादिकं सदा।

उद्धृत्य देवं पानीयं मधुपर्केन सादरम्।

पत्रं पुष्पं गृहीत्वाच दक्षिणेनतु पाणिना।

अधोमुखाङ्गुलेनैव दध्यात् देवाय भक्तितः। (नारदीये-पाद्मे)

षड्वेर विषये निवेदन क्रममाह

मूल विग्रह देवस्य आदौ नैवेद्यकं चरेत्।

तथा उत्सव देवस्य नैवेद्यंच समर्पयेत्।

मूलविग्रह देवीभ्यां श्रीभूमिभ्यां निवेदयेत्।

स्नान मूर्तिंच नैवेद्यं बलिमूर्तिमतः परम्।

यागमूर्तिंमतःपश्चात् भोगमूर्तिमतः परम्।

सालग्रामञ्च नैवेद्यं पादुकास्तदनंतरम्।

अनंतं गरुडंचैव विष्वक्सेनं प्रपूजयेत्।

चण्डः प्रचण्डं द्वारस्थं भक्त बिम्बं प्रपूजयेत्।

नैवेद्य काले उत्तमादि क्रम भेदाः

उत्तमा पञ्चविंशत्या मध्यमं पक्षमेव च।

अधमं नवमं प्रोक्तं नैवेद्यंच समर्पयेत्। (विहगेन्द्रे)

भगवतःप्रसादस्वीकरण विषये

नैवेद्यं पुरतोन्यस्तं चक्षुषा परिगृह्यते।

रसान् भक्तस्यजिह्वाग्रे अश्नामि कमलोद्भव।

आचार्य भोजनेहीनेदेवपूजाच निष्फला।

यथाचाऽग्निमुखे भुङ्क्ते तथा कारिमुखो हरिः। (पारमे)

निवेदनविषये भक्तबिम्बानां अलाभे

मुक्त मार्गेण सर्वेषां पार्थिक्येन निवेदयेत्।

गुरु शिष्यानुभन्धे तु शेषेणवा समाचरेत्।

देवी सूरिजनादीनां मूत्र्यऽभावे हरेःपदे।

तत् भावना प्रकारेण तत्तन्मन्त्रेण समर्चयेत्।

निवेदने चतुर्भागं सेनेशाय निवेदयेत्।

गुरुभिः शेष शेषाशनेनापि सादरम्।

अन्येभ्य परिवारेभ्य सर्वं शेषं निवेदयेत्।

सेनेश भुक्त शेषंच तत्भूतेभ्यः प्रदापयेत्। (पौष्करे)

भक्ष्यादीनां निवेदने वैशेषिकं

अपूपादि फलादीनि दर्शयेन् मुद्रया विना।

भक्ष्यं फलं इक्षुसारञ्च ताम्बूलं लाज पिष्टकम्।

शर्करा दधि पानीयं गुळं मुद्गादि खण्डनम्।

इक्षुखण्डं नाळिकेरं मूलमन्त्रेण निवेदयेत्। (शाण्डिल्ये)

भगवत्प्रसाद, मन्त्राणांच विक्रिये प्रत्यवायः

मत्तीर्थं मत्प्रसादंच दत्वायो याचयेद्धनम्।

सजीवेनैव चण्डाळः सवैसन्मातृ विक्रयी।

स्वभार्या विक्रयीचैव सयाति नरकं ध्रुवम्।

कृत्वा तापादि संस्कारंधनार्थी याचते गुरुः।

सवै चण्डाळ इत्युक्तो सपत्नी विक्रयीप्यसौ।

आचार्यो मन्त्रधातारं मोक्षमार्गैक साधनम्।

अवमन्यति मूढात्मासयाति नरकं ध्रुवम्। (कपिञ्जले)

<u>ताम्बूल निवेदनस्य विशेषत्वं समयानिच</u>

मुहूर्त शुद्धिः स्नानकाले नैवेद्यमर्चनेतथा।

दन्त दावन दानंच वीqथ रथ्यादि यानयोः।

कुम्भादि शान्ति होमेच ताम्बूलंच निवेदयेत्।

<u>ताम्बूल निवेदनस्यक्रमः</u>

जाति पत्रं जातिफलं क्रमुकद्वय मिश्रितम्।

एला लवङ्ग नाळिकेरं नागवल्लि दळैर्युतम्।

मुक्तादि चूर्ण सम्युक्तं ताम्बूलंच निवेदयेत्। (वि-तिलके)

<u>प्रापणं, तर्पणस्य लक्षणे</u>

फलपक्करसादीनि भक्ष्यभोज्यादि संयुतम्।

मधुरादि रसोपेतंप्रापणं समुदाहृतम्।

अपक्कै रतिपक्कैश्च सुपक्कैर्जल पक्ककैः।

पानीयैरिक्षु शकलैःनारिकेळ्जलैरपि।

एतैस्तुतर्पयेद्देवंतर्पणं समुदाहृतम्। (शाण्डिल्ये)

<u>धनुर्मासे मुद्गान्न निवेदने फलम्</u>

धनुर्मासार्चनंचैव पूजयेत् पुरुषोत्तमम्।

उत्तमं त्रिशतं भारं मध्यमं द्विशतं भवेत्।

अधमंशत भारंच निस्त्वचा मुद्ग संयुतम्।

गोघृतेन सहितं त्रिविधंच प्रकीर्तितम्।

तदर्धंवा तदर्धंवा यथा विभव विस्तरम्।

यत्किञ्चिदपि नैवेद्यंदध्यात् भक्ति रसाच्युतम्।

तदन्नं मेरुणा तुल्यं अनन्त फलदं भवेत्। (अगस्त्ये)

मुखवासस्य लक्षणं

नाळिकेरैश्च शकलं एलाजाति लवङ्गकम्।

जाति पत्रञ्च तक्कोलं चूर्ण पुच्च मरीचकम्।

मुखवास मिति प्रोक्तं देवदेवाय दापयेत्। (सनकं)

अन्यत्र

क्रमुकं शकलं भिन्नं अभिन्नं वा मुनीश्वर।

कर्पूर तैल संसिक्तं अपक्वं पक्वमेववा।

ताम्बूलवल्लि पत्रैश्च नाळिकेर फलैरपि।

एलाफलाति जातिभिःलवङ्गेनच संयुतम्।

शिलारेणु समायुक्तं कर्पूर सहितेनच।

समस्तं प्रणवेनैव मुखवासं प्रदापयेत्। (विष्णुतत्वं)

अन्यत्र

क्रमुकस्यफलं भिन्नं अपक्वं पक्वमेववा।

कर्पूर तैलसंसिक्तमसिक्तंवा मुनीश्वर।

तांबूलवल्लिपत्रैश्च तप्तहेमप्रबोधनैः।

एला तक्कोलजातीभिः कर्पूरं विहितं क्रमात्।

मातुलङ्गफलैर्युक्तं नाळिकेरफलान्वितम्।

शिलाचूर्णेन संयुक्तं कर्पूर सहितं तथा.

संस्कृतं प्रणवेनैव मुखवासं निवेदयेत्। (विष्वक्सेनम्)

अन्यत्र

एलालवंग तक्कोल जातिभिश्चान्वितं शुभम्।

मुखवासं शुभंविद्यात् तांबूलमितिच द्विज। (नारदीये)

पुष्पाञ्जलिं प्रदातव्या भक्त्या प्रत्युपचारतः।

प्रत्यासनं नकुर्वीत पादुकाभ्यादि पञ्चकम्।

गन्धाक्षतञ्च पुष्पञ्च धूपञ्चैव समर्चयेत्।

योगासनाञ्च देवानां दातव्यञ्च यथाक्रमम्। (श्रीधरीयं)

लक्ष्म्याः वास स्थलानि

लक्ष्मीः बिल्ववने कदम्ब कुसुमे दिव्याङ्गणा कुञ्जरे।

श्वेताश्वे रथगोपुरेच धवळे छत्रे ध्वजे चामरे।

शङ्खं पद्मवने नरेंद्रभवने गङ्गाजले गोकुले।

सत्यं शौचयश्च सलक्षणगृहे श्रीविष्णुवक्षस्थले। (ल तन्त्रे)